नोट टीन कैटलाग में यह पुस्तक नहीं है।

नं० ४३२०-घ इसको रजीस्टर में है।

मीमांसानयवादः

नं० ४३२० -घ

पत्राणि ९०

4320

४३२०
८० पत्र

~~[illegible]~~ मीमांसानयवादः

४३२०

न॰ वा॰ श्रीगणेशाय नमः । ॐ उयायिनामयनास्येमत्रेक्ष्यते उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोतीति तन्मा
१ साग्निहोत्रं नैयमिकाग्निहोत्राद्भिद्यते न वेति जैमिनीमांसकानुसारिणः पूर्वपक्षिणः श्रीशंकराचार्यमतानुसारि
णश्च सिद्धान्तिनः । विकृतिप्रत्यासंनायेप्राप्ते सिद्धान्तानुसारिणो वादिनः प्रथमा कक्ष्या मासाग्निहोत्रं नैयमि
काग्निहोत्रान्न भिद्यते विधिवाक्ये श्रुताग्निहोत्रनामकत्वात् । यद्विधिवाक्ये श्रुताग्निहोत्रनामकं न तन्नैय
मिकाग्निहोत्राद्भिद्यते यथा यावज्जीवमग्निहोत्रं जुहोतीति श्रुतं यवागूपाकमग्निहोत्रं । अत्रैवैश्वानरविधां
गभूते प्राणाहुतिकर्मणि सपक्षमविद्यमानमग्निहोत्रं जुहोतीत्यथांगाणां नपोसभस्मनि जुहुयात् इत्युक्तस्या
न्नूइस्यर्थवादश्रुताग्निहोत्रनामकेऽभिचारवारणार्थं विधिवाक्ये श्रुतेति हेतुविशेषणं । अथान्यविधिवाक्य
श्रुतत्वविशिष्टं यदग्निहोत्रनाम तद्विपक्षत्वादिति हेत्वर्थः । तेनार्थवादश्रुतं यदग्निहोत्रनाम तद्देवविधिवाक्ये गम॰ १
श्रु १ ऽश्रुतमिति तदुपलक्षितत्वमादाय व्यभिचारतादवस्थ्यं । शंका । यानावकाशत्वाद्यदाग्निहोत्रनामसमानाधिकरणविद्यु

दृष्टान्तेऽपि न जुहोतिविषयत्वादिति हेतुः न चाधानाङ्गे तूष्णींहोमे पुनराधानाङ्गे समस्तवतीहोमेषु वर्यंपिगेधर्मेषो
षहोमे च व्यभिचारः तेषां तूष्णीमग्निहोत्रं जुहोति। सप्त ते अग्ने समिधः सप्त जिह्वा इत्यग्निहोत्रं जुहोति एतस्मा
देव योगादुपयमनेनाग्निहोत्रं जुहोतीति विधिवाक्यस्कताग्निहोत्रनामत्वात्तत्समानाधिकरणविधिवाक्यस्क
त जुहोतिधातुविषयत्वादित्यवाच्यं तेषु प्युक्तसाध्यानुपगमेन तेषां पक्षसमत्वादिति॥ अथ प्रतिवादिनः
कक्ष्या द्वितीया॥ विपक्षे बाधकतर्काभावादप्रयोजकोऽयं हेतुर्नोक्तसाध्यसाधनक्षमः प्रायणीयोऽतिरात्र इति
द्वादशाहिके प्रथमेऽहनि श्रूयमाणप्रायणीयनाम्नो गवामयनिके प्रथमेऽहनि वैश्वानरो ज्योतिष्टोमः प्रायणीयमे
तदहर्भवति ओति देव पुरस्ताद्धनरात्रिभवत्तोननामाभेदेऽस्यापि धर्मभेदस्याभ्युपगततया नामैकस्य कर्मैक्या
प्रयोजकत्वात् तस्मात् साग्निहोत्रं नैयमिकाग्निहोत्राद्भिद्यते। नैयमिकाग्निहोत्रहोमविध्यसन्निहितो नेका
विषयकत्वाभिधेयानां गनामार्थसंक्रान्तिरहितविधिपरजुहोतिविषयत्वान्नाप्युक्तसाधनं न तूक्तसाध्यं यथा सम

न०वा०
२

वस्याप्रूर्णाहुतिं जुहोतीति विहितं पूर्णाहुतिकर्म अन्यथा प्रकरणात्काग्निहोत्रहोमे नैयमिकाग्निहोत्रप्र
करणपठितयवागूप्रकरणविधिपरजुहोतिविषयेव्यभिचारवारणार्थं नैयमिकाग्निहोत्रहोमविध्यसान्निहिते
ति विशेषणं नैयमिकाग्निहोत्रहोमः स्वविध्यसन्निहितस्याहवनीयाद्यनुगुणविधिपरस्य यदाहवनीये जुहो
तीत्यनारभ्याधीतवाक्यस्य जुहोतेर्विषयो भवति न तु तस्माद्विधिपनः इति तत्र व्यभिचारवारणार्थमेनेका वि
षयकेति आहवनीयवाक्यगतो जुहोतिधातुर्नानाप्रकरणपठितानन्तनारभ्याधीतांश्च सर्वानपि होमानाहव
नीयगुणविधानार्थमनुवदतीत्यनेकविषयत्वान्न तत्र व्यभिचारः। य एवं विद्वानग्निहोत्रं जुहोति यावदग्निहो
मेनोपाप्नोति तावदुपाप्नोतीत्यर्थवादस्य तस्य नैयमिकाग्निहोमविध्यसन्निहितस्य होमान्तराविषयस्य
जुहोतेर्विषयो भवति नैयमिकाग्निहोत्रमतस्तत्र पुनरपि व्यभिचारः स्यात्तद्वारणार्थं विधिपरेति विशेषणं न चा
र्थवादस्य जुहोतेरपि विधेयतात्पर्यमस्ति अर्थवादानां यत्किंचिद्विध्येकवाक्यतां विना प्रामाण्याभावादिति शंक्यं।

2

राम०
२

।विधिपरत्वे न तु तद्वाराऽनपेक्षविध्यर्थत्वस्य विवक्षितत्वात्। अमावास्यायां रात्रौ त्वपंजमानोपस्वाग्नि
होत्रं जुहोतीत्यत्र चारुरूपजुहोतिविषयनैयमिकाग्निहोत्रे व्यभिचारवारणाय स्वाभिधेयानङ्गसंज्ञां तिरस्कृते
ति विधिविशेषणांतेन भवति व्यभिचारनिरासः। तस्मिन्वाक्ये कृतस्य विधेरग्निहोत्रहोमानङ्गमात्रस्यार्थद
धिषु प्रजुह्यवागूसंज्ञान्तत्वात्। एवं सति हेतोः स्वरूपासिद्धिः स्यात्। मास्तामग्निहोत्रविधेर्जुहोत्यभिधेयानङ्गतत्क
रणाकारख्यातार्थभावनासंक्रान्तिसत्त्वादिति तद्वारणायानामार्थविशेषणानामार्थत्वमिह नाममात्रसमर्पितत्वं
विवक्षितं। अतो जुहोत्यग्निहोत्राङ्गत्वमानं च नार्थनिर्द्धातीति वाक्येनाभिधेयो होमः स्वस्य त्वपमनङ्गमाग्निहोत्र
नामार्थस्य भवतीति विधेस्तत्रापि तत्संक्रान्तिसत्त्वात्स्वरूपासिद्धिनादवस्थामिति शङ्कायानावकाशः। तथा च नैयमिका
ग्निहोत्रविध्यसन्निहितानैयमिकाविषयकत्वाभिधेयानङ्गनाममात्रसमर्पितार्थसंक्रान्तिरहितविध्यनविषयकत्वस्य सिद्धा
दनपेक्षोपयोगवत्त्वं जुहोतिधात्वनुविषयवत्त्वादिति हेत्वर्थनिष्कर्षः। यद्यप्येतद्यवागूविधिर्नातं च नार्थः किं तु नास्येता

न·घा· ३

3

रात्रिं कुमारीश्च न पयो लभ्यं तदा तस्य दृष्टत्वाय सर्वस्यापि यजमानगवीनां पयसो दार्शिकदध्यर्थत्वेनावि
नियोक्तव्यत्वादग्निहोत्रस्य पयोभावेन दधि तंडुलयवाग्वादियत्किंचिद्धिकाल्पितद्रव्यान्तरं गृहतोऽन्यस्य यवाग्
त्विय मार्थः॥ यवाग्वैतां रात्रिमग्निहोत्रं जुहोत्यादिष्टं वा इदं देवतायै हविर्गृहीतं भवनियस्य योपद्धि पय
सा जुहुयाद्यथान्यस्मै देवतायै हविर्गृहीतं तदन्यस्मै जुहुयादेवं हतं समदं कुर्यात्तस्माद्यवाग्वैतां रात्रिम
ग्निहोत्रं जुहोतीति शतपथश्रुतेस्तरोदर्शनार्थं गृहमेधिये शावातं चनमावे पिसर्वीसां दुग्धे सायं चरुमिति स
र्वस्या यजमानगवीनां पयसो गृहमेधीयविनियुक्तत्वादग्निहोत्रस्य पयसोऽभावेनैव यवाग्वैतां रात्रिमग्निहोत्रं जुहो
त्वीति शतपथश्रुतेस्तत्र एवंविधानाचारत्वात्रो हृतयवागू विधो व्यभिचारजादवस्येमिति तदानैष्यमिकाग्निहो
त्रप्रकरणानाम्नातविधिप्रयोगचारत्वादिति हेतुः कार्यः आहवनीयादिवाक्ये पुनर्विधेर्गुणसंक्रान्तत्वात्रस्याभिचारः ए
वमप्यग्निमेधस्य कल्पानन्तरं दीक्षायाः प्राग्राज्ञो वाग्यमं विधाय ०० मुजे वाग्यतस्यैतां रात्रिमग्निहोत्रं जुहोतीति

रा·म· ३

प्रातरग्निहोत्रस्य रात्र्या व्युषः कालेऽपकर्षविधौ व्यभिचारः सायंकालस्य गुणस्याप्यनुपादेयस्य विधानायोगेन
कालमुद्दिश्य होमस्य विधेयत्वादिति तदा नैयमिकाग्निहोत्रप्रकरणाम्नातहोमानुष्ठापकविधिगोचरत्वा
दिति वा उभयासिद्धे नैयमिकाग्निहोत्रविषयमितरविधिगोचरत्वादिति वा हेतुर्द्रष्टव्यः अपकर्षार्थविधेर्हिमानुष्ठा
नार्थत्वाभावादाद्यहेतोर्न व्यभिचारः द्वितीयहेतोः संदिग्धासिद्धिवारणार्थमुभयासिद्धेति विशेषणं अथवा दिन
स्तृतीया। कल्प्यपदैकपदी यो हेतुः प्रयोजक इति तन्नावदग्धं मासाग्निहोत्रस्य नैयमिकाग्निहोत्राद्भेदेन द्वि
वा कश्चनाग्निहोत्रनामस्यास्वभंगप्रसंगस्य विपक्षबाधकस्य सत्त्वात्। तथाहि। तस्य नैयमिकाग्निहोत्राद्भे
दाभ्युपगमे तस्मिन्नग्निहोत्रपदस्य मुख्यार्थत्वान्निरिष्यते अमुख्यत्वा वा। आद्येऽप्यग्नये होत्रहोमद्रव्यमस्मिन्निति व्यु
त्पत्तीनयोगरूढ्या वा स्वप्रतीतफलारूढ्या वा नाद्यः यथा नैयमिकाग्निहोत्रे यदग्नये च प्रजापतये च सायं जुहोतीति तत्
स्वकारणाम्नातेन देवताविधिनाऽग्निर्ज्योतिरिति मंत्रवर्णेन वाऽग्निर्देवतात्वमवगतं एवं मासाग्निहोत्रे केन वि

ने॰ वा॰
४

दुपायेन तस्यानवगतत्वात् । न द्वितीयः । अन्याय्यानेकार्थत्वमिति न्यायविरुद्धानेकार्थकल्पनस्यायुक्तत्वात् । न चा
ग्निदेवत्वाभावे विप्रागत्यग्निहोत्रे प्राप्तेः । इति चेत् प्रकृतस्य तस्यानेकार्थत्वकल्पनमवर्जनीयमिति वाच्यम् । अग्नि
होत्रं जुहोतीति विधावोल्लत्रस्यैकस्यैव नैयमिकाग्निहोत्रहोमस्य सायं जुहोति प्रातर्जुहोतीति तत्र करणमात्रानवा
क्यां सायंप्रातःकालयोरुपासनस्यावोदितत्वेन सायंहोमाभिन्ने प्रातर्होमेप्यग्निदेवतात्वसद्भावात्सारणात् । इति चार्य वा
दिकस्याग्निहोत्रशब्दस्य अन्यदीयनामत्वेन सतो दर्शपूर्णमासयोः प्रयोजकत्वस्य के रूपे दर्शपूर्णमासयोरेव प्रथशब्द
स्यैव प्रत्यद्विषयजमानशब्दस्यैवोपचारिकत्वेन च तात्पर्यस्यार्थशक्तिकल्पनानपेक्षणात् । द्वितीयपक्षे अनु
त्याऽऽवृत्तिः लक्षणागौणावानायः तन्मुख्यार्थभूतनैयमिकाग्निहोत्रसंबंधानवगमात् सत्रमध्ये कर्तव्यस्य मासा राम॰
ग्निहोत्रस्य नददातिन जुहोतिन पचतीति सोमप्रयोगमध्ये पर्युदस्तत्वेन तेनैककालसंबंधस्याप्यभावात् । गौणप ४
क्षप्रसिद्धसादृश्यमूलानंसंभवति मासाग्निहोत्रे तेन होमांतरयावृत्तस्यानस्यांतर्वहिरंगस्यैकस्य चित्तोदृष्टस्य

षमितृष्टान्तात्। तस्माल्लक्षणातो जघन्यत्वेन मीमांसकैः प्रयुज्यमाना गुणो णा वृत्तिपक्षे विकल्पसादृश्यमूलत्वेना
ति[illegible]क्लिष्टा गौणी वृत्तिः प्रयुज्यते। न च नेयमिष्टाग्निहोत्रनामेक्षांगीकारे गमुख्यवृत्तिसमर्थनसंभवे तदप्रयु
ज्यमानो युक्तः। प्रापणी यथा ग्रस्तस्य यथा प्रयुंक्ति प्रारंभं ते अनेनेति प्रसङ्गस्य साद्यादशाहिके प्रथमेऽह्नि वृत्तिः तथा गावा
मयनिके विवृत्तिरूपपद्यत इति क्लिष्टवृत्तसंतरकल्पनादोषाभावात् तत्स्तस्मादुद्दिश्यते न स्तोत्रप्रथमसमाप्तास्तु
लै ज्योतिष्टोमनाम्नः प्रवृत्तिनिमित्तस्य[illegible]त्वबादतिक्लिष्टकल्पसादृश्यमूलकगौणवृत्तिकल्पनादोषपरिहारा
य ज्योतिरेवप्रस्ताद्धनइति ज्योतिष्टोमप्राप्यस्य प्रतिपादकवाक्यशेषसामंजस्याय वत्तस्य ज्योतिष्टोमहृप्प्रस्तु
त्यतिराम्नामेदएवेष्यते। तस्मान्मदीयहेतोः रूक्तसाध्यानं गीकारे अग्निहोत्रनामत्वाद्यंभंगप्रसंगइति विप
क्षबाधकसत्त्वात्तात्प्रयोजकत्वशंकावकाशः। त्वदीयहेतौ तु रूपस्य सत्त्वप्रतिकूलतर्कपराहतत्वात्तस्या प्रसा
धनक्षमइति। अथ प्रथमवादिमन्यस्तुरीयकल्पः॥ प्रकरणान्तरेण मासाग्निहोत्रवाक्यगतप्रधानमूलभाल्लत्थैने

यमिकाग्निहोत्रहोमाद्भिन्नतया प्रतीयमाने तदुपसर्जनीभूतं नाम नत्तदभेदत्रस्यभिक्षां जनयितुं क्षमते । त
स्मान्नैयमिकाग्निहोत्रे पृथगसंगृहीतशक्तिकेन नाम्ना तदुपस्थितेरवश्यंभावे पि तस्य नाम्नः प्रधानभूतधात्व
र्थेनैयमिकाग्निहोत्राद्भिन्नेरन्नेरवश्यपदार्थत्वेन तत्रप्रवृत्तिनिमित्तस्याक्रमतया मुख्यवृत्तसंबंधमवाप्तिं होदे
वदत्तेऽस्यत्रप्रधानभूतविशेष्यपदस्य । सा तु होघाप्तिं हयाघस्येवगो । तारतन्नेरवकस्मनीयत्वेन सा तदुपस्थि
तिर्गौणावृत्तिमुख्यभूतस्य सादृश्यप्रतियोग्युपस्थितित्वेनोपयुज्यते इति एवांगीकर्तव्यं । न च यदुक्तं साध्यसा
दृश्यमूला गौणापत्तिः क्लिष्टेति तन्न दसिद्धसादृश्यमूलगौणावृत्त्यपेक्षया तस्या एवजाघत्वात् । न तथाहि साघपक्षेय
थासिद्धसादृश्यान्नवादमात्रसिद्धेः न तत्तु कश्चिदनुष्ठानविशेषो लभ्यते द्वितीयपक्षे तु मासाग्निहोत्रे होमस्यानुप
दिष्टेतिकर्तव्यताकस्य नैयमिकाग्निहोत्रपक्वार्त्तव्यतापरे । गानाम्नानैयमिकाग्निहोत्रधर्मातिदेशकेनाकां
क्षितेतिकर्तव्यतालाभादनुष्ठानविशेषो लभ्यात इत्यन्यदीयनाम्नोऽन्यत्रप्रवर्तनं सफलमभ्युपेतान्तस्मात्सा

ष्मसादृश्यमूलकगौणवृत्तिप्रसंगस्यैवापादनरूपत्वात्तदीपहेतोरप्रयोजकत्वं तदवस्थामदीपहेतोश्च
नप्रतिकूलतर्कपराहतिरिति॥ अथवादिनः पंचमीकस्मात् अप्रसिद्धार्थस्यनाम्नो राजसूयनामवदाख्या
तपरतंत्रत्वे प्रसिद्धार्थनामनाख्यातपरतंत्रं किंतु नदेवनामपरतंत्रं दर्शपूर्णमासफलवाक्ये तथादर्शना
त्। तथाहि। यदाग्नेयोऽष्टाकपालोमावास्यायांचाच्युतो भवति तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशुपौर्ण
मास्यायजन्तावग्नीषोमीयमेकादशकपालंपूर्णमासे प्रायच्छत् उपांशुयाजमंतरायजन्निऐंद्रं दध्य
मावास्यायामैंद्रं पयोमावास्यायामिति पौर्णमास्यमावास्याकालयुक्तविधिविहितानामाग्नेयादीनां षण्णां यागानां
समिधो यजति तनूनपातं यजतीत्याद्यकालयुक्तविधिविहितानां प्रयाजादियागानां च सन्निधावाम्नाते दर्शपूर्ण
मासाभ्यां स्वर्गकामो यजेतेति तिवाक्ये श्रुतेन यजिना फलसंबंधबोधनार्थं सन्निहितयागाननुवदता सन्निहितत्वा
विशेषेणाग्नेयादीनामिव प्रयाजादीनामप्यनुवादे प्राप्ते पौर्णमास्यमावास्याकालसंबंधिभ्यामाग्नेयादिषट्क एव लक्षणा

पावर्त्तमानं दर्शपूर्णमासनामधेयमनूद्य तस्मिन्नेव यागषट्के प्रवर्त्तेत इति प्रसिद्धार्थनामपरतन्त्रत्वमा
ख्यातस्यांगीकृतं तद्वदिहाप्यंगीकर्त्तुं योग्यं तस्मादिह नाम्नो मुख्यार्थग्रहणे बाधकाभावादबाधितमुख्य
तदर्थस्यासंभवं गृहीतं गोदोषः स्यादेवेति मदीयो हेतुर्नाप्रयोजकः त्वदीयस्तु प्रतिकूलतर्कपराहत इति । अथ
प्रतिवादिनः पक्षे कश्चित् । सर्वत्र गुणभूतं नामैवाख्यातपरतन्त्रं न कश्चिदप्याख्यातं नामपरतन्त्रं नाम्न
श्चाख्यातपारतन्त्र्यमाख्यातानुपस्थाप्यार्थास्पर्शिनाख्यातोपस्थापितेनैवार्थेन वर्त्तनं तद्दर्शपूर्णनाम्नो
ऽर्थविकलनेन हि तदुपस्थाप्यानां षण्णां यागानां मध्ये कश्चिदप्याख्यातानुपस्थाप्योऽस्ति येन तमर्थं स्वय
मुपस्थाप्य तत्राख्यातमपि वर्त्तयतीति नाम स्वातन्त्र्यं भवेत् । तस्मान्नाम्नः सर्वत्राख्यातपारतन्त्र्यान्न पापा
दिहापि षट्कर्मभेदनियमितहोमान्तरतात्स्वार्थकाख्यातपरतन्त्रस्य नाम्नो मुख्यार्थग्रहणे बाधकसत्त्वा
न्मुख्यार्थस्यासंभवे गौणे दोष इति त्वदुक्तप्रयोजको मद्धेतुस्तु न प्रतिकूलतर्कपराहत इति ॥ अथ वादिनः

6

सप्तमीकस्या॥ नाम्नः स्वार्थं कंचिदर्थं धात्वनुपस्थापनीयमनुपस्थाप्य तत्र धातोर्वृत्तिं न यथा स्यात् तदर्थं तथा
धातूपस्थापनीयानां मध्ये केषुचिदेव स्वशक्तिबलेन संकोचनमपि स्यात् तदर्थमेव तत्र इह नाम्नः स्वशक्ति
बलाद् व्यावर्तनस्यार्थस्यानुपस्थापनीयेऽर्थे तद्वृत्तेर्न रूपमपि स्यात् तदर्थं मास्तु न त्याज्या व्यावर्तनप्रतंत्रत्वेनाभ्युपगंतव्य
नाम्नः क्वचिद्विषये स्यात् तदर्थं घटचित्रे स्पर्द्धजरतीयमाश्रयितुं युक्तं तदाश्रयतो वा वैपरीत्ये न स्यात् तदर्थं किमिति
नाभ्युपगम्येत तत्स्मान्नाम स्वार्थस्य भंगेन युक्त इति मद्गुरुर्नाप्रयोजकः स्वद्गुरुश्चशनिकूलतर्कः १२ हन्त इति
। अथ प्रतिवादिनो ऽष्टमीकस्या। व्यावर्तकस्वभावानां विशेषणानां विशेष्यपदस्वार्थस्यानुरोधेन संकुचित
हन्नितत्पादत्वं विशेषणतास्वभावासिद्धं नीलमुत्पलमरुणपाकी तातीसादि लौकिकवैदिकप्रयोगदर्शनं
चेति न तत्रा— पृष्णानभूतव्यावर्तनविरुद्धा चरणरूपमतत्वं व नानाम्नामव्यावर्तनपारतंत्र्यमनुहानिरिति व्या
तस्वार्थस्यानुरोधेन नाम स्वार्थस्य भंगेन दोषः अन्तस्वद्गुरुरप्रयोजको मद्गुरुस्तु घनशनिकूलतर्कः १३ हन्त इति ॥ अ

न॰ वा॰
८

थवादिनो नवमीकक्ष्या॥ यथा व्यावर्त्तकस्याभावस्य स्वविशेषणस्य स्वशक्तिवत्त्वेनाख्यातं एको चन
म विरुद्धमेवं नान्यः स्वशक्तिवलानीतेर्थे वर्त्तनमप्यविरुद्धमेव। नहि नैयमिकाग्निहोत्रविधिसंनि
धिर्नात्तीये तावतामासाग्निहोत्रवाक्यस्थमाख्यातं तद्भिन्नत्वेन होममुपस्थापयतीति वक्तुं शक्यं तद्भिन्नत्वे
प्राक्तनाभावात् किंतु नैयमिकाग्निहोत्रसंनिधभावादभिन्नत्वेनैनोपस्थापयतीत्येतावद्वक्तुं शक्यं। तथा
चाख्यातस्यभेदाभेदयोरोदासीन्येसत्याख्यातसामानाधिकरण्येननाम्नास्वशक्तिवलादाख्यातेनैयमि
काग्निहोत्रवृत्त्यापादनमविरुद्धमाख्यातस्यापिकांस्यभोजिन्यायेननामानुवर्त्तनंन्याय्यं। अतो नाम
स्याख्यभंगो हेत्वइति मद्धेतुर्नीप्रयोजकत्वद्धेतुः प्रतिकूलतर्कपराहतइति। अथप्रतिवादिनो दशमीक
क्ष्या। यदुक्तं इहाख्यातं भेदाभेदयोरुदासीनमितितद्युक्तं तस्यभेदपक्षस्यानतिलातत्। तथा— । इहाख्यात
स्यनैयमिकाग्निहोत्रविधेयत्वेतस्यपरामर्शकदध्यादेनगुणविधानार्थत्वस्यापिविधानार्थीवास्या

रा॰म॰
८

त्वात्ताघः श्रावककर्मानुवादेन मासोपसदामंतर्भूतगुणद्वयविधाने नाकाम्ये दृष्टसंगात्तान्न च तेषां
द्वादशोपसद इत्युपसदां मासमग्निहोत्रं जुहोतीत्यत्र होमस्य च पाठतः प्राप्तः क्रमः उपसद्भिश्चरित्वा मासे
नान्वृपजे मासगुणमात्रं विधीयत इति न वा काम्ये दृष्टसंगात् इति वाच्यं। अंगांगिभावादिनैकप्रयोगांतर्गतो
पसदां त्वनुष्ठानापेक्षितः क्रमः पाठक्रमेणैकस्येतनच पुरुषार्थस्याग्निहोत्रहोमस्य क्रत्वर्थीनामु
पसदां चांगांगिभावादिकमस्ति। अत एवोपसदामग्निहोत्रांगत्वस्याग्निहोत्रस्योपसदंगत्वस्य वा विधाने
तस्य मासगुणस्य च विधानान्नाकाम्ये दृष्टसंगः। तस्मादनुवादपक्षस्यायुक्तत्वाद्विधिपक्ष एवाश्रयणीयः।
न चाविहितस्य पुनर्विधानं संभवतीत्यपात्यां तं विधियोग्यं होमांतरमेवोपस्थापयेदतो नामग्नस्तस्यांत
रस्य तद्विधिद्वार्थसमर्पकत्वायोगात्स्मुख्यार्थस्य कारस्यसंगोन दोष इत्यपरे पोऽन्यकृत्स्नहेतुमेहेतुध्वनप्रति
कूलतर्कपराहत इति। अथ वा दिनैकादशीकस्याविधिपक्ष एवाश्रीयते विहितस्यापि विधानं सर्वांगत्व

सिध्यर्थयुक्तं सन्ति हि सत्र प्रकरणमध्यविधाने प्रकरणोन्नतस्य सर्वांगत्वं हि भवति। यथा दर्शपूर्णमा
सप्रकरणे विहितानां प्रयाजादीनां दर्शपूर्णमासाङ्गत्वं दृष्टं च प्राप्तस्यापि पुनर्विधानं प्रयोजनान्तरार्थं
चित्रिणीरुपदधाति वज्रिणीरुपदधातीत्यादेस्तथा हि। इष्टकाभिरग्निं चिनुत इति विधिनेष्टकानामग्न्या
धारस्थण्डिलविशेषनिर्वर्त्तकत्वमवगतं न चानुपहिताभिरिष्टकाभिः स्थण्डिलं निर्वर्त्तयितुं शक्यत इति
सर्वासामिष्टकानामुपधानमर्थतः प्राप्तमेव तथापि चित्रिणीरुपदधातीत्यादिविधिभिः कासांचिदि
ष्टकानां प्रत्यक्षवचनेनोपधानं विधीयते तत्तासां मध्यमचितिशासिरूपप्रयोजनार्था। एवं हि श्रूयते यां
कांचन ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चितावुपदध्यादिति। अत्राभिरूपवीजानातिः प्र
त्यक्षे वर्त्तते तथा च यामिष्टकां प्रत्यक्षाम्नानेन विहितां तां प्रत्यक्षेण मध्येः पंचसु चितिषु मध्यमचितावेवा
पदध्यान्न चित्यंतर इति तस्यार्थः एवं च वज्रिणीरुपदधातीत्यादि प्रत्यक्षाम्नानविधानेन वज्रिण्यादीष्ट

कामानां नियमेन प्रसांगात्कस्मोचिन्मात्रुपधेयत्वेन शास्त्राणां मध्यमचिन्तावेवोपधेयाः इति नियमस्य प्र
प्रयोजनार्थत्वात् प्रधानस्य विधानं न दृष्टिः हविर्हितस्यापि नैयमिकाग्निहोत्रस्य पुनर्विधानमंगत्व
स्य प्रयोजनांतरार्थं भवेत् । तस्मान्नाममात्रयोर्विरोधाभावात् नाम्नो मुख्योऽर्थभंगाप्रसंगो दोष एवेति न म
द्धेतुः प्रयोजकः तद्धेतुश्चाप्रतिकूलतर्कपराहत इति ॥ अथ द्वादशी कृष्णा ॥ नैयमिकाग्निहोत्रस्य स्वतंत्रस्य क्र
त्वर्थतालाभार्थं पुनर्विधानमिति नेष्यते एकस्य स्वातंत्र्यपारतंत्र्ययोर्विरोधात् । न हि स्वातंत्र्ये अंशानुरूपार्थसाध
नेशक्तस्तत्साधनार्थमन्यांगभावं भजत इति युक्तं तस्मान्मासाग्निहोत्रवाक्येन विधेयः सत्रांगभूतो होमः कर्मांत
रमिति नामार्थयोर्विरोधाभावात् नपारतंत्र्यस्य नाम्नो मुख्योऽर्थभंगो न दोष इति तद्धेतुः प्रयोजको मद्धेतुश्चानप्र
तिकूलतर्कपराहत इति । अथ वादिनस्त्रयोदशी कृष्णा । किंचित्फलसाधने स्वयं प्रधानभूतस्य फलांतरसाध
नेन्यांगतायां न तावदर्थविरोधः फलभेदेनोभयोपपत्तेः प्रमाणादिषु दृष्टत्वात् नापि तदुभयबोधकशब्दविरोधः

न० बा० एकस्यैव दर्शपूर्णमासांगत्वश्रवणानलोमपयोषकत्वे हि विरोधः स्यात् । इह तु नैयमिकाग्निहोत्रप्रकरणपठितवा
९ क्येन प्राधान्यं । प्रकरणपठितवाक्येनांगत्वमिति विनियोजकवाक्यभेदान्न प्रकृतविरोधोऽपि । तस्मात्तामाम्यजयो
र्विरोधाभावान्नानयोर्मुख्यार्थभंगो दोष एवेति न मन्दैस्तु प्रयोजकः स्वद्वैतु स्वपति कृत्वा नर्कपरा हतः इति । अ
थ प्रति वादिन चतुर्दशी वाक्या ॥ यद्वैदिकं कर्म प्रधानं न तदस्य एककर्मणोंगमिस अभिचरितस्य हचार
१ दर्शनेन नियमो वधृतः न चेत्यम वधृतस्यानियमस्य वाधनं पुरुकमतः सन्तोगतया विधेयो होमो नैयमि
काग्निहोत्राद्भिन्न इति नामाम्यजयोर्विरोधान्नानयोर्मुख्यार्थभंगोन दोष इति त्वंदैस्तु प्रयोजको मन्दै
स्तु स्वपति कृत्वा न कृत्वा नर्कपरा हतः इति । अथ [redacted] रा म०
वादिनः पंचदशी कल्पा । यत्प्र ९
धानं च तत्कर्मणि तदंगमिति नायं नियमो ऽपि प्रयत्नेन ह रणाभिचारणानां यथा हि दर्शपूर्णमासप्रकरणे स्तु

ऋत्वाकेनत्र स्तं संप्रदानमिति अपनेयस्त्र रत्नहरणरूपं कर्मतत्स्वपक्षकरणमात्मनात्सिद्धदर्शपूर्णमासांगत्वं ना
वनि विवादं। आयुरादिफलसाधनत्वरूपं प्राधान्यमथ त्वितत्कारणत्वेन ऋतेहि सूक्तवाकमंत्रे फलान्यायु
रादीनि संकीर्तितेमंत्रस्य क्रियाकारणत्वान्नदृष्टान्तोपपद्यो गितत्स्मारणसंपादनद्वारेण चायुरादिकीर्तिन
स्यसाक्षात्स्वहरणक्रियाकारणहेतुत्वमस्तिअतः कीर्त्यमानानामायुरादीनां तया क्रियया संबंधः कल्पनीयः।
तथा सति हि क्रियासंबंधि कीर्तनस्य संबंधिस्मारणद्वारा स्मारकत्वमुपपन्नं भवति संबंधस्याश्रयमानानामा
युरादीनां क्रियया सह कल्प्यमानो योगपत्तथा फलफलिभावरूप एव पर्यवस्यति। अतः सूक्तवाकमंत्र
कारणकत्वान्यथानुपपत्तिसिद्धमायुरादिफलसाधनत्वरूपं प्राधान्यमवश्यमभ्युपगंतव्यमिति सुष्ठो व्यभिचार इति
। अथ पत्रजित्यादिः षोडकसा।। यत्प्रधानं तत्कर्मांतरांगमिति नियमे प्राधान्यं फलसाधनत्वमात्ररूपं न विवक्षितं
। किंतु यत्कर्म प्रसंगत्वमिष्यते तत्स्य योगाद्धि हि तत्रसानेन फलसाधनत्वं नचैतत्सूक्तवाकहरणे स्तितस्य दर्शपूर्णमास

10

प्रयोगाद्बहिरनुष्ठाने निष्फलत्वात्तस्मान्नास्त्यस्मत्कव्याप्तेर्व्यभिचार इत्यन्वयः॥ नेयं व्याप्तिरस्ति विपक्षबा
धकतर्काभावात्। यथा राजसूयांतर्गता पाञ्चबेष्टिः पवित्राद्यारभ्य क्षत्रस्य धृत्यंतानेकयागांतदङ्गता हि से
नस्या राज्यफलसाधनत्वेप्येतया नाद्यकामं याजयेदिति विधिबलेन राजसूयाद्बा॥ रनुष्ठीयमानायाः
फलांतरसाधनत्वा एवं सर्वांगनयानद्वारा स्वतंत्रफलोपयोगिनोपि अग्निहोत्रहोमस्य स्वतंत्रप्रयोगाद्बहिरनुष्ठी
यमानस्य स्वतंत्रफलसाधनत्वोपपत्तेः। यदि तत्रैतयेति सन्निहितपरामर्शित्वेनामबलाद्राजसूयप्रकरण
स्नातायाश्च पञ्चावेष्टेः स्वातंत्र्येण फलांतरसाधनत्वमपि व्यतेत्र हि स्वतंत्रफलसाधनस्यैवाग्निहोत्रस्य तत्सामर्थ्या
काग्निहोत्रनामबलात्सर्वांगत्वमपि व्यक्तं विशेषाभावादिति। अ॰ प्र॰ श॰ १५॥ उक्तव्याप्तावसिद्धे विपक्षबाधकतर्का
भावः प्रकरणांतरे स्वतंत्रफलसाधनतया विहितस्यान्यत्रापि प्रकरणे कर्मांतरांगत्वेन विधेरंगीकारेणाभेदप्रसंग
स्य विपक्षबाधकस्य जागरूकत्वात्मासाग्निहोत्रवाक्ये नैयमिकाग्निहोत्रस्यैव सत्त्रे विधानं करोतीत्यभ्युपगमे

त्यसन्निहितेनैयमिकाग्निहोत्रस्य प्रत्यभिज्ञानं प्रत्यभिज्ञापि न स्पष्टे विधाने चेत्तूभयमत्र वचनेन संपादनीयं
।एकं चात्र वचनं न चैकं व्यापारद्वयाविष्टं भवितुमर्हति। न च प्रत्यभिज्ञावचनं पदमात्रकृत्स्य विधाने वाक्यकृत्स्य
इत्यवाक्यभेदः शंकनीयः। पदं हि त्वया ज्ञाने यमिकाग्निहोत्रं स्मारयति परं तु धात्वर्थे तदभेदं प्रत्यभिज्ञा
पयति पदमभ्यधिकाभावात् स्मारकत्वान्न विशिष्यत इति न्यायात्। अभेदबोधनं तु वाक्यस्य कृत्यमिति स्यादेव वा
क्यभेदः। प्रत्यभिज्ञाहरणस्य तु अंगस्य सतः प्रकरणान्नातवाक्येन विधानमात्रं क्रियते फलसंबंधबोधनं मंत्रालि
गकृत्यमिति न वाक्यभेदप्रसंगः। यद्वा स्वाग्निहोत्रं जुहोतीत्यत्रापि दध्ना जुहोतीत्यत्रेव संनिधिलभ्यप्रत्यभिज्ञाप
नं न तु नामधेयत्वं एतयान्नाद्यकामं याजयेदित्यत्रापि तथैव एतेन ग्राकांतरंगतत्वेन न बहिरंगः संनिधिर
पि प्रत्यभिज्ञापकस्थेदेकवाक्यगतत्वेनांतरंगनामकल्पनं प्रत्यभिज्ञापकमिति शंकापि निरस्ता। संनिधेः प्रत्य
भिज्ञापकत्वेन कल्पितवाक्यस्य क्लृप्तत्वान्नलोमिन्नतयान्तत्रवाक्यभेददोषप्रसंगान्नदहनाम्नः प्रत्यभिज्ञापक

न·वा·
११

त्वेऽस्तिनाममात्रस्यतन्त्रासामर्थ्येनविधायकस्यवाक्यस्यैवतत्रापिव्यापारस्यवक्तव्यतयावाक्यभेदस्याव
र्जनीयत्वादिति।अथैकोनन्वा·स्या।विधिव्यापारभेदेनैववाक्यभेदोभवतिनतुप्रत्यभिज्ञापनविधिव्यापा
रभेदात्।अन्यथागृहमेधीयाऽऽज्यभागविधावपिवाक्यभेदःप्रसज्यते।तथाहिचातुर्मास्येष्वाम्नायतेमरुद्भ्यो
गृहमेधिभ्यःसर्वासांदुग्धेसायंचरुमिति।तत्संविधावाम्नायतेआज्यभागौयजतीति।गृहमेधीयेष्टेःदर्शपूर्ण
मासतोऽतिदेशात्संभवत्प्राप्तिकयोराज्यभागयोःपुनर्विधानंक्रियतेप्राकृतौवाज्यभागावेवस्यातांप्राकृता
निप्रयाजादीन्यङ्गान्तराणीति।यथानस्युरित्येतदर्थंतत्राज्यभागनाम्नोपस्थापितयोःप्राकृतयोराज्यभागयोःप्र
त्यभिज्ञापनेनतयोर्गृहमेधीयेविधानंचैकस्मिन्वाक्येऽनुपपन्नमितितत्तद्विहाविस्तावन्नचतेनवाक्येनविधान राम·
मात्रंक्रियतेनप्रत्यभिज्ञापनंदर्शपूर्णमासवत्कुर्यादित्यतिदेशवाक्यरूपेणचोदकेनविपरिवर्त्तमानयोराज्य ११
भागयोर्वाक्येनप्रत्यभिज्ञानस्याकरणीयत्वात्इहतुनतथाप्रत्यभिज्ञापकमस्तीतिवाक्यंअनन्तरोक्तादाज्यभा

गप्रास्यानंतरमाज्यभागौ यजतीति वाक्यं न प्रवर्त्तते प्राप्तयोर्विधानस्यानपेक्षितत्वेन वाक्यस्याज्यभागव्यतिरिक्तां
गांतरनिषेधार्थतया परिसंख्यारूपत्वकल्पनायां प्रसंगात्। न चेष्टापत्तिराज्यभागविधिरूपस्यार्थस्याभागः प्रयाजादिनि
षेधादिरूपपरार्थपरिग्रहश्चोदकप्राप्तप्रयाजादिबाधश्चेति प्राप्तपरिसंख्यायां दोषत्रयप्रसंगात्। किंतु प्रागेव चोद
ककल्पनात् गृहमेधीयस्येतिकर्त्तव्यतारूपव्यापारापेक्षस्य प्रत्यक्षश्रुतत्वेनोपकारकाज्यभागव्यापारसंयोजनयानि
राकांक्षतापादनेन तदाकांक्षामूलकचोदककल्पनाप्रतिबंधद्वारा गृहमेधीयस्य प्रकृतिग्राहितस्वरूपापूर्वसंसिद्ध्यर्थ
मिदमाज्यभागव्यापारविधानं प्रवर्त्तते। अतश्चोदकप्राप्तविपरिलोपसिद्धेः प्राकृताज्यभागप्रत्यभिज्ञापनमप्याज्यभा
गौ यजतीत्यनेनैव लभ्यं अतस्तदभावेनायाक्यभेदो न समर्थयितुं शक्यत इति विपक्षबाधकतर्काभावान्
नोक्तव्याप्तिरस्तीति॥ अथ प्रतिवादिनः शिंशीकस्य॥ गृहमेधीयाज्यभागवाक्येन प्रत्यभिज्ञापनमात्रं क्रि
यते न विधानं तु प्रकरणात्कल्प्यतां वचनान्तरस्याभिसंप्रत्ययेन एवमेव हि वार्त्तिककृता प्रकरणान्तराधिक

न० वा०
१२
1.2

रसेन गवामयनादिगतानि ज्योतिर्गौरायुरित्यादीन्यहःक्लृप्तिवचनान्येकाहः। क्रतुरूपाणामेव सोमया
गानां सत्रैकदेशानयाविधानार्थं प्रत्यभिज्ञापकानि न तु तद्धर्मककर्मान्तरपराणीति स्वाभिमतं सिद्धान्तं
व्यवस्थापयन्नाह स्वप्रत्यभिज्ञापनमात्रे ज्योतिर्गौरायुरित्यादिवचनस्य सत्रैकदेशतया फले विधानं तु य
कामयजेतेत्यनेनाप्नुवन्तीति फलवचनस्य सत्रस्य वाक्यभेदः समर्थितः। उक्तं हि वार्त्तिके वचनेन पर्युदस्या
प्यपरेणा फले विधीयन्त इति। न चैवं मासाग्निहोत्रवाक्येन प्रत्यभिज्ञापनं प्रकरणकल्प्यवाक्येन संज्ञागत
पाविधानमिति वाक्यभेदः समर्थयितुं शक्यः। मासशब्दस्यैव पर्यायप्रत्यभिज्ञापकवाक्य एव मासमुद्दिश्य हो
मविधानस्याप्यङ्गीकर्त्तव्यत्वात्। अतो वाक्यभेदः प्रसंगरूपविपक्षबाधकतर्कसत्त्वात् उक्तं यामि सत्रदृष्टेति
॥ अ: ए०। गवामयनिकाग्न्यहःक्लृप्तिवाक्यं दृष्टान्तमवलम्ब्य गृहमेधीयवाक्येन प्रत्यभिज्ञापनमात्रे क्रिय रा० म०
तेन विधानमिति वाक्यभेदसमर्थनमयुक्तं तेनैव वाक्येन पूर्ववार्त्तिककृतानामभिधाने भावनायास्त्रेधा त्वर्थेनापजि १२

क्कृतेः। इति विधेयभावनाभेदस्य तत्तद्विध्यर्थ्यसोऽतिः कार्यंगोः कार्यद्दत्यादिरूपेणभावनाविध्यर्थप
दाध्याहारस्यचोगीहृततत्पातेषांप्रसमित्रापनमात्रहृस्यमिति वक्तुमशक्तत्वात् वार्त्तिककृता तदं
तरमुद्दाहृतेवाहरणानिष्कसेनजुहुयाश्वमर्थंपतीतिवाक्यांतरेजुषनिष्कासरूपस्वदेयद्रव्यायतदुभय
विशिष्टकर्मविधानस्याप्यगीकर्त्तव्यत्वेनतेस्यसोमिकावमृथप्रसमित्रापनमात्रंकृस्यामिति। वक्तुम
शक्यत्वात्। तस्माऽऽपोऽतिरादिदृष्टांतेनगृहमेधियवाक्य। स्यस्यसमित्रापनमात्रपरतोपादानेन स्ववाक्यभे
दः समर्थयितुंनशक्यते किंतु दृष्टांतेनैवप्रस्यमित्तापनंविधानंचेस्कूमयमविगृहमेधीसंयवाकोंगीक
रणीयमिति तत्र विधानद्वयाभावेनैव स्ववाक्यभेदः समर्थनीयः तद्वन्यासाग्निहोत्रादिवाक्येष्वप्यवाक्य
भेदसमर्थनमुपपन्नम् इति विपक्षबाधकतर्काभावात्। स्वदुक्तव्याप्तिरप्रयोजिकेति। अथ षड्विंशतिः प्र
तिवादिनः। विधानभेदेऽसत्येवाक्यभेद इति परिभाषामात्रं अर्थभेदमात्रेवाक्यभेदो नियतः चैत्रोगच्छतिमे

न॰ वा॰
१३
13

त्रः पश्यतीत्यादिष्वविधिपरेष्वपिवाक्येषु भेददर्शनात्तत्तत्स्वमासाग्निहोत्रादिवाक्येषु प्रत्यभिज्ञाप्यवि
धेयरूपार्थद्वयांगीकारे वाक्यभेदप्रसंगो न शक्यनिवारण इति दृष्टो विपक्षबाधकः तर्कः गृहमेधीयवा
क्ये न तु प्रत्यभिज्ञापनमात्रं किंतु यत्ते विधानं तु प्रकरणात्कल्प्यवाक्येनेति न वाक्यभेदः प्रसज्यते न हि तत्र
भावनाभेदोऽस्ति सोमादिषु चोदकप्राप्तयोरिव गृहमेधीये प्रत्यक्षवचनप्राप्तयोः यथाज्यभागयोस्तद्व
स्यानभ्युपगंतव्यत्वात् न वा गुणश्रवणमात्रमिति यत्तु ज्योतिरादिदृष्टान्तासिद्धेस्तद्दृष्टान्तेन प्रत्यभिज्ञानमा
त्रपरतामुपपादयत्स्ववाक्यभेदसमर्थनमशक्यमित्युक्तं तदभिप्रायानवबोधविलसितं न हि गायामय
निकज्योतिरादीनामेकाहज्योतिराद्यभेदो वारुणप्रघासिकावभृथस्य सौमिकावभृथाभेदश्च वार्त्तिकका
राभिमत इति तदभिमतदृष्टान्तोपादानं कृतं वार्त्तिककृतैव तु पूर्वटीकायां तथावभृथः सोमादिति सौत्रामि
काधिकरणे सौमिकावभृथाद्वारुणप्रघासिकावभृथस्य भेदमेदमेकादशिनीतिवत्त्र्यनीकापरिहृतेः

स्यादिति दृष्टान्तिकाधिकरणो ज्योतिष्टोमाद्येकाहक्रतुप्रयोगाद्गवामयनिकसोऽतिरात्रादीनां भेदं वप्रकरणान्त
राधिकरणान्यायप्राप्तिरुत्सिद्धवत्कृत्स्ये वचनेभ्यः प्राप्तिश्रुत्यादिधर्मातिदेशस्य च बहुत्वात्तद्भेदे सत्यनएव
धर्माणां प्राप्त्यातिदेशानपेक्षणात् तान्न चात्र प्रमाणं इव दृष्टान्तवद्वायनसमभिमतार्थसमर्थनमिति प्रकृ
तार्थसिद्धेश्च वक्ष्यापेक्षितदृष्टान्तोपादानं कृतं । दृष्टान्ताभावे विविधेयत्वाभावनाच्च वत्वाभावे नैव प्रत्य
भिज्ञामात्रं गृहमेधीयवत्काकस्याभिप्रायपादान्विन्तु शकालान् किंतु यत्र प्रत्यभिज्ञामात्रं वा कल्प
नित्यमुपगमे प्रत्युपपत्तिरस्ति । तत्रापि न तदभ्युपगमः प्रोषितवाद्येनकृतो दृश्यते सप्तदशोपपत्तिर्नास्ति
गृहमेधीयादिवाक्ये तत्रप्रामाण्यैकस्य तदभ्युपगमस्य ज्ञापकस्याभिप्रेतत्वात्तत्कोऽपि विरोध इति । अ
थ. नत्वेवं यदुक्तं विधानभेदे सत्येव पृथगासमे दइत्येवं नास्ति नियम इति तन्नियमपंजनमनुक्तोपालंभनं
। नहि तथा मयाऽनियम उक्तः किंतु यथा विधानभेदेन वाक्यभेदो भवति नैवं विधानप्रत्यभिज्ञानाभ्यां समवता।

न॰ वा॰ त्येनावदुक्तंतत्रनान्तिकस्थत्वदोषः नचतत्रापिप्रत्यभिज्ञापकंविधानमितिव्यापारभेदेनवाक्यभेदः
१४ शंकनीयः प्रसिद्धभेदबोधनंहिप्रत्यभिज्ञापनमुच्यते। नतुप्रसिद्धाभेदबोधनंतथाचयथारुणःप
दोभवति इत्यत्रप्रत्यक्षादिप्रसिद्धारुणिमगुणविशिष्टाभेदवतिपदेरुणपदसमानाधिकरणेनप
दपदेनप्रत्यभिज्ञाप्यमानेतस्मिन्भवनक्रियासंबंधमात्रंवाक्येनबोध्यतेयथावाऐन्द्रमयेदाग्नेपुरो
15 डाशमष्टाकपालंनिर्वपेदितिअभ्युदयेष्टिवाक्यमंत्रवर्णप्रसिद्धदातृत्वगुणविशिष्टाभेदवस्ययोदात
पदसमानाधिकरणेनाग्निपदेनप्रत्यभिज्ञाप्यमानेतस्यहविःसंबंधमात्रंवाक्येनबोध्यतेतत्रोभयत्रा
पिप्रत्यभिज्ञापकांशेऽनुवादरूपत्वान्नवाक्यभेदः तथात्रापिऐन्द्रमिकाग्निहोत्रप्रकरणगतोत्पत्तिवाक्यादिप्र
सिद्धाग्निहोत्रादिनामविशिष्टाभेदवतिहोमेनामसमानाधिकरणेनधातुनाप्रत्यभिज्ञाप्यमानेतस्यविधिसंबं ग म॰
धमात्रंवाक्येनबोध्यतेतेननतत्रावाक्यभेदशंकावसरंलभतेनचतथापिगृहमेधीयवाक्यदृष्टान्तेनप्रत्यभि १४

ज्ञापनविधानाभ्यां नयाः क्व भेदः प्रसज्यत इति समर्थनमनुपपन्नं तस्याऽज्ञातार्थस्यापि ज्ञापनमात्रपरत्वो
पपन्ने रिति वाच्यं। विध्यभावे समीहितसाधनतामतीत्या समीहितविशेषाकांक्षाविरहेणान्योन्याकांक्षालक्ष
ण प्रकरणानुपपत्तिस्तथाऽभावयोस्तन्मूलगृहमेधीयांगत्वकल्पनासिद्धिप्रसंगात्। अत एव चाहुराचार्याः न
चाविहितत्वं संभवतीति। यत्तु गावामयनिकऽस्मोतिरात्रादिदृष्टान्तासिद्धिवचनमभिप्रायानवबोधविलसि
तमिति वचनं। तदेव वार्त्तिकग्रन्थानवबोधविलसितं वार्त्तिके हि भिन्नेषु भावनामात्रं धात्वर्थानामयजिष्ठतेरिति
गावामयनिकेऽस्मोतिरात्रादिष्वेकाहऽस्मोतिरात्रादिभ्यो वाऽऽहरणप्रयासिकावम्भय्योद्भावनामात्रकृत एव
भेदेन धात्वर्थभेदकृत इति अयमेव पक्षः पारमार्थिकत्वेनोपन्यस्तः। ननु तत्र कोटिवादन्यायप्रयोगयुक्तं देशमसम
माधिकरणयोरिति देशावचनेनानुभावनाभेदादुपपद्यते अपूर्वभावनयास्तु ल्लिङ्किकर्त्र्यनन्यायोनधात्वर्थेन एवमे
वमासाग्निहोत्रमासदर्शपूर्णमासादिषु नेयमिग्याहोत्रदर्शपूर्णमासादिभ्यो धर्मातिदेशसमर्थनमप्युक्तं क्रियाभि

न॰ वा॰
१५

15

धानतत्कृतावयवत्वविधिषु प्रदेशः स्यादिति साप्तमिकाधिकरणोक्तं भावनाभेदादेव। नचातिदेशवचनस्य भा
वनाभेदे नैवोपपन्नत्वमिति भावत्वान्नाभेदोऽग्निहोत्रादिनाम्नां मासाग्निहोत्रादिषु गौणत्वोक्तेर्नोपपद्यते इति नाम्नां धात्व
र्थगोचरत्वादिति वाच्यं नैयमिकाग्निहोत्रादिषु च मासाग्निहोत्रादिषु प्राकरणिकेष्वेतत्ताभिधानादिभिरप्यग्निहो
त्रादिनाम्नां प्रवृत्तिनिमित्ताभिव्यक्तिर्नास्ति किंतु नैयमिकाग्निहोत्राद्यभेदानुसंधानेन तद्धर्मातिदेशानुसंधाने
न च प्रवृत्तिनिमित्तत्वमवगन्तव्यमित्यस्फुटशक्तिकत्वाभिप्रायाः गौणत्वोक्तेरेव भाष्यादिदृष्ट्या गौणत्वान
प्रत्यक्षाद्गुणसंयोगात्क्रियाभिधानं स्यात्तदभावेऽप्रसिद्धं स्यादित्युक्तं क्रियाभिधानमित्यधिकरणगुणसूत्रेतोव
नयाभिप्रायस्फुटीकरणात्। किंच तथा व्यवस्थः सोमादिति साप्तमिकाधिकरणोवहरणप्रघासेषु विधीयमाने
व्यवस्थस्सौमिकाव्यवस्थ एव विवक्षितः। न तु तन्तोऽन्यत्र कर्मिक इति अव्यवस्थशब्दस्य प्रथमान्तत्वेनावसीयते वारुण
प्रघासिके अव्यवस्थनामके कर्माणि सौमिकाव्यवस्थाधर्मग्रहणमित्यर्थविवक्षायां त्वव्यवस्थशब्दोपंचम्याभाव्यः एव रम॰ १५

मपि तत्राधिकरणो माष्यादिषु यत्तस्मिन्नवमप्यशब्दस्य गौणत्वव्यवहारस्तस्याभिप्रायः कथंचिदिदमेव वर्ण-
नीयः । तत्र गावामपि निकृष्टोतिशरीरं वाहृत्ताप्रधानिकावस्थशब्दस्यैवप्रसिद्धाभेदो ऽस्मान्नामपदस्य वर्णनात् । इह मा
साग्निहोत्रमासदर्शपूर्णमासादिवज्जुहोतियजिप्रवर्तसति कथमभेदः स्यादिति चेत् न प्रकरणान्तरगतस्या
थाख्यातस्य धात्वर्थभेदाभेदोदासीनस्य प्रत्यवस्थापितत्वेन नामार्थप्राप्यमाणस्य प्रसिद्धाभेदस्यानिवारणात् अभि
धत्ते भावनामात्रं धात्वर्थेनापि जिघ्रतेरिति श्लोकगतस्यापि जिघ्रतेरित्यस्यायं भावः यजिप्रवणो हि तदर्थभेदः प्रक
रणान्तरात् शङ्केनापि सत्यप्यनुपलब्धीति । अत एव हि प्रकरणान्तराधिकरणे वार्तिककृता नामधात्वर्थमात्रं वसंन्नि
धाप्येत शक्तितः भावनात्वनुपस्थानाद्विधिमानानवार्यते सामानाधिकरण्ये न हि सर्वासां नामधेयानि धात्वर्थानां
नामधेयत्वेनावस्थितानि न भावनानां तेन भावनान्तरत्वानन्यत्वपरीक्षावेलायां सत्यपि धात्वर्थैकत्वे भावनानानात्वद
नस्य प्रमाणत्वादाख्यातप्रत्ययान्तरेणानुपनीयमाना न कथंचित्समभिज्ञायत इत्युपपन्नमप्रयोजनान्तरमिति श्लो

न. वा.
१६
16

तथा ज्योनाभ्यांमासाग्निहोत्रादिषु भावनाभेदमात्रं न धात्वर्थभेदो नाम्नात्त्वत्राभिज्ञानादिति भाव्यार्थभेदेऽपि भा
वनाभेदमात्रेण प्रकरणान्तरेण कर्मभेदे सामान्यप्रत्ययत्वं भावनायास्तत्त्वान्न स्वत्वपरीक्षाया एवाध्यायप्रमेयत्वादि
ति प्रकरणान्तरे [redacted] प्रयोजनान्यत्वमिति सूत्रमपि भावनाभेदे एवार्थे
समंजसं प्रयोजनशब्देन प्रधानवाक्यार्थभूतभावनापरत्वे एवस्वारस्यादिति च एवमुक्तं तस्मिन्नधिकरणे
वाग्निकारणं धात्वर्थस्यापि भेद मा भूदित्युपपक्षान्तरे प्यासस्तु भावनाभेदे दृष्टीकरणार्थः प्रौढिवादः यदि
नैयमिकाग्निहोत्रस्य विहितस्य पुनर्विधानमनर्थकं भवेत् तदा विधेयगुणसावाप्य पयदाभ्यस्तेन गुणसंक्रां
तिरहितस्यानभ्यासादधिकरणान्यायतः स्यात् स्वेन धात्वर्थेनाविशिष्टोऽविधिः कर्मान्तरमेव विदध्यादतः प्रधानभू
तास्वाप्ततरं मन्त्रं नामापि विशेषपञ्चा पितमुख्यार्थबाधदृश्येन कर्मान्तरमेवं वक्तीति संज्ञान्तरं शङ्कते न संभवति तु विहितस्या
पि नैयमिकाग्निहोत्रस्य सत्राङ्गत्वसिद्ध्यर्थं पुनर्विधानमिति समर्थितमेव एवं प्रकरणान्तरापि कारणान्याय

राम.
१६

समावर्तनाभेदमात्रनिविष्टत्वमभिप्रेत्यैव शंकरभगवत्पादैः श्रीकण्ठाचार्यैर्विवरणाचार्यप्रभृतिभिश्च पुरुषार्थ
स्यैव सौत्रामणिबृहस्पतिसवादेः अग्निचयनवाजपेयादिप्रकरणान्तरेषु तन्त्रत्वकर्माङ्गतया विधानं तत्र तत्र द्र
ष्टं तत्तया व्यवहृतं गुरुणा च निबन्धनटीकायां अग्निचयनवाजपेययोः सौत्रामणिबृहस्पतिसवयोः कर्मा
न्तरत्वं व्यवहृतवता विवरणटीकायां प्रसिद्धसौत्रामण्यादिरूपत्वमेवोक्तं तस्मान्मासाग्निहोत्रादिषु प्रकरणा
न्तरात्कर्मभेद इति मीमांसकव्यवहारः कर्मशब्दं धात्वर्थैकान्तिकमभिमन्यमानानां नैयायिकानां अग्निहोत्रान्मासाग्नि
होत्रं भिन्नमिति गतानुगतिकप्रसिद्धिमवलम्बमानानां च केषांचिज्जरन्मीमांसकानां प्रकरणान्तराधिकरणवा
र्त्तिकादिहृदयानभिज्ञानानां मतमयुक्तमेवाऽऽ इति मासाग्निहोत्रवादः। यथा मासाग्निहोत्रमग्निहोत्रपदवाच्यमे
वं क्रत्वर्थपशुसंज्ञपनं हिंसिधातुवाच्यं तथापि न हिंस्यादिति निषेधस्य विषयो न भवतीति सिद्धान्तस्थितिः। अत्र
वादिनो बहुविधाः। यथा तः शामाकरणात्तावद्रागप्रयुक्ता हिंसा निषेधविषयः क्रत्वर्थसंज्ञपने तु न रागतः प्रवृत्तिः

किंतु विधितः इति व्यवस्थां कल्पयंति। कौमारित्वेनैवाधिकाद्यप्यत्नलागं विनाप्रवृत्तसंभवान्नेयं व्यवस्थोपपद्यते
किंतु विधिसंस्पृष्टस्य निषेधविषयताया विरुद्धत्वादाहवनीयविधिः पदहोममिव हिंसानिषेधः क्रत्वर्थसंज्ञ-
पने परिहृत्य प्रवर्त्तत इति व्यवस्था वर्णनीयेत्याहुः। सांख्यास्तु केनापि प्रकारेण व्यवस्थावर्णनाया क्रत्वर्थसं-
ज्ञपने विध्यधीनस्येष्टसाधनत्वस्य निषेधाधीनस्यानिष्टसाधनत्वस्य च समावेशसंभवान्नपशुवधप्रयुक्तस्या-
ल्पस्यानिष्टस्य वित्तव्ययायासदुःखस्येवाभ्युपगमेन क्रतुसाध्यमहाफलार्थितया प्रवृत्तेरुपपन्नत्वेन विनिषे-
धाधीनप्रवृत्तिनिवृत्तिसमावेशे दोषस्यानवकाशत्वादित्याहुः। भागवतास्तु सांख्यवत् क्रत्वर्थसंज्ञपनस्य नि-
षेधविषयत्वमनंगीकुर्वाणास्तत्समर्थितविधिनिषेधविरोधनिराकरणोपायमथनालोचयंतः श्रूयते हिर-
ण्यशरीरः स्वर्मयेति न वा उ वेतन्म्रियसे न रिष्यसीति पशुहिंसाया अहिंसात्वमिति श्रीकंठाचार्यस्तु व्याख्यानप्र-
तिपन्नमर्थमवलंबमानाः क्रत्वर्थसंज्ञपने हिंसैव न भवतीत्यभ्युपगमेन तस्य निषेधाविषयत्वमसाक्षिंप

रिहरंति। इदमेव मतं पूर्वपक्षतयाभिनिवेश्य श्रीकंठाचार्याणां माश्रयागतं कौमारिलोद्दीरितं सिद्धांततया परि
गृह्य कस्याविशेषानुषंगिकत्वस्य भावः। समानिराकरणगर्भवादकथावरूपतेन क्रत्वर्थपशुसंज्ञपनं
हिंसाधात्वर्थं मारणत्वात्। यन्मारणं तद्धिंसाधात्वर्थं यथाभिचारमारणमिति प्रयोगमाकलय्य। अप्रयोजकमिद
क्रोधादिकृतस्य मारणस्य वधदाहच्छेदादेर्निग्रहहेतुत्वविषयाणां स्वार्थकृतस्य तस्यानुग्रहरूपत्वेनानिग्रहत्ववत्
क्रत्वर्थस्य मारणस्य हिंसाधात्वर्थत्वेऽपि न वा उवेतन्म्रियसे न रिष्यसि देवां इदेषि पथिभिः सुगेभिः। य
त्र यंति सुकृतो नापि दुष्कृतस्तत्र त्वा देवः सविता दधात्वित्यादिश्रुतिसिद्धपशुस्वर्गसिद्धिपर्यवसायितया प
श्वनुग्रहरूपत्वेन क्रत्वर्थस्य तस्य तद्वाच्यत्वोपपत्तेः। तस्मात्क्रत्वर्थपशुमारणं न हिंसाधात्वर्थं क्रत्वर्थत्वात्। य
त्क्रत्वर्थं तन्न हिंसाधात्वर्थं यथा शोषणमिति हितिपाकरणा। अथ तृतीया। मदीयानुमानं तावन्नाप्रयोजकं क्र
त्वर्थमारणेऽपि हिंसाधातुश्रुतिनिमित्तस्य सत्त्वेन तस्य तद्वाच्यत्वाभावायोगात् मरणफलोपहिततत्कारणक्रियात्वं

हि तस्य प्रवृत्तिनिमित्तं मरणकारणत्वमात्रस्य योग्यतासाधारणस्य शत्रुमारणोद्देशकत्वस्यायतितापृथक्से
फरोमरणफलकत्वमात्रस्य कारणकारणरूपान्यथासिद्धसाधारणस्य पंगुपतितनगवादिमरणफलकत्वन
टाकनिर्माणाद्दैवातिप्रसक्तत्वेपि विशिष्टस्यानतिप्रसक्तत्वात् न च क्रत्वर्थपशुमारणस्य हिंसात्वेनदृष्टुग्र
हत्वानुपपत्तिर्गणशंसस्यर्थक्रतदा हष्ठेदाहेः प्रवृत्तिनिमित्तानुसारेण शाहष्ठेदाहिरूपत्वेप्यनुग्रहत्ववत्क्र
त्वर्थपशुमारणस्य तदनुसारेण हिंसात्वेप्यनुग्रहत्वोपपत्तेः तस्मात्प्रयोजकं मदीयानुमानं त्वदीयमेवा
नुमानमप्रयोजकं कस्य प्रवृत्तिनिमित्ताधीनस्य तत्त्व त्वर्थस्य क्रत्वर्थत्वे सत्यप्युपपत्तेरिति। अथ चतुर्थीत्व
दनुमानं तावदप्रयोजकमेव त्वदुक्तमात्रस्य हिसिधानुग्रहप्रवृत्तिनिमित्तत्वाभ्युपगमे क्रत्वर्थपशुमारणस्य
न हिंस्यात्सर्वाभूतानि इति निषेधविषयत्वापत्त्यातन्त्रवृत्तिनिमित्ते क्रत्वर्थपशुमारणव्यावर्तकविशेषण
स्यानिवेशनीयतया तावन्मात्रस्य तत्प्रवृत्तिनिमित्तत्वासिद्धेः न च न हिंस्यादिति निषेधो रागप्राप्तहिंसा

विषयत्वादिति विधिप्रयुक्तांश्च त्वर्थहिंसां न स्पृशन्ति कामाधिकारे करणांशे रागतः प्रवृत्तिरिन्द्रियेष्विवेति विशे
षाभ्युपगमात्। तथा च न श्यावर्तकविशेषणं हिंसापदप्रवृत्तिनिमित्तेन निवेशनीयमिति वाच्यं तस्य वि
धिप्रयुक्तानुष्ठानत्वे विहिंसात्वाभ्युपगमेन हिंसादिति वाक्येन रूपेण क्रोडीकृतस्य तस्य निषेध्यतायाः
श्यनिवार्यत्वात्मेति कर्त्तव्यताकस्य फलकारणत्वेन फलसिद्धिमिच्छतस्तदर्थकारणांश्चांगेष्वपि रागावश्याव
श्यंभावेन तेषु विरागत एव प्रवृत्तेः स्फुटपयसाश्चाईजातीयकल्पनायोगाच्च भगवताजैमिनिनापि तृतीयाध्या
ये षट्त्रिंशत्कपालाचीचतुर्विंशतिः प्रयोगेण त्रिंशत्त्रयघनेनेति विहितास्तोमिकीमहावेदिः केवलप्रधाना
र्थीत्यभिज्ञाश्यामहे स्यां इति तद्धा कर्मशेषे एतावति भूमागे कर्तुः शक्ष्याम इत्यर्थकतुमन्प्रत्ययार्थस्विकीर्षासं
योगान्न तंगप्रधानार्थीत्यंगानामीप्सितफलसाधनत्वाभावेनाचिकीर्षितत्वादित्येवं चिकीर्षायाश्च संयोगादि
ति सूत्रेण पूर्वपक्षयित्वा नत्वयुक्तेतुफलश्रुतेः तस्मात्सर्वाचिकीर्षास्यादिति सूत्रेणात्मकलांगयुक्तेफलश्रु

न०वा०
१९
19

तेः सर्वत्र प्रधानेंगत्वलापेच चिकीर्षितात्स्वर्गीनांत्रपि चिकीर्षितत्वाविशेषादंगप्रधानार्थ्यमहावेदिरिति
सिद्धं नयत्नांगेष्वपि रागतएव प्रवृत्तेः स्यादितत्वाच्च षष्ठाध्याये विप्रमान्यं तच्चिकीर्षाहि जन्त्रिसंतच्चिकीर्षा
हीत्यादिसूत्रगतेश्चिकीर्षादिरित्यादेः रंगेषु रागतः प्रवृत्तेर्थ्यवहतत्वाच्चानन्वंगेष्विच्छा नास्तीति तन्नोच्यते इच्छां विना
प्रवृत्त्यसंयोगात् किंतु कारणांशेफलत्वस्ति स्वर्थत्वेन रागप्राप्ताभिलषफलेच्छाधीनयेच्छया प्रवृत्तिः कामाधिकारे
प्रप्रथमपरामृष्टस्वर्गादिफलकारणभावस्य यागस्य विधिशब्दाभिलप्यनियोगात्मकार्यविषयातयान्वयेस
तिविषयावच्छिन्नतया तस्य लिङ्गाच्यस्य कार्यस्य प्रतीतिरिति कार्यप्रतीतितः प्रागेव यागे फलकारणत्वस्य प्रतीत
तया तत्र फलरागाधानेच्छया प्रवृत्तो चिता तत्रंगानां प्रथमं कार्येणान्वयः पश्चात्कार्यद्वारा फलोपकारकत्वाव
गतिरिति तेषु प्रथमान्वितकार्यसंपादनेच्छया प्रवृत्तौचितेति चेत् मैवं विगतीनयागे स्वर्गकारणत्वसंघटक राम०
नियोगस्य कार्यस्य प्रतीतितः प्राग्यागे स्वर्गकारणत्वप्रतीत्यसंभवान्मतांतरेऽपि वग्गहृमतेऽपि द्वारव्यतिरेकनिश्चयाभा १९

वेनयोग्यतासंदेहमात्रात्कारणत्वावगतिसमर्पने तथैव साक्षात्स्वसाध्यस्यापि नियोगस्य स्वकृतिसाध्यतासं
घटकस्य यागादित्वद्वच्छेदकरूपविषयप्रतीतिं विनापि प्रतीतिसंभवेन यागादिरूपविषयावच्छिन्नतयैव का
र्यप्रतीतिप्रक्रियायाश्चनाश्रयणीयत्वात्तदाश्रयणावश्यभावेऽपि स्वरूपेण वा यागादेर्विषयतया कार्यावच्छेद
कत्वसंभवे न विषयताप्रतीतेः पूर्वं यागस्य स्वर्गकारणत्वपरामर्शस्यानपेक्षणात्स्वर्गकामकृतिसाध्यत्वं स्वर्ग
कारणत्वमंतरेण न संभवतीति चेन्मा संभूत्तावता स्वर्गकारणतावगतिमंतरेण शब्दतो नियोगस्य स्व
र्गकामकृतिसाध्यत्वावगतेरुपपत्तेः। न हि वह्निमंतरेण धूमो न संभवतीत्येतावता पर्वते धूमोना
तीति शाब्दत्वेन तत्र धूमावगतिर्वह्न्यवगतिमंतरेण न संभवति। न तु कुमततप्रक्रियया घटयितुमपाकापि करणां
शेषाणां ततः प्रवृत्तिरंगेषु वेणीति मर्यादा कुमारिलपक्षे स्यादेव तन्मते प्रथमं यागस्य स्वर्गकारणत्वप्रतीतिस्तन्नि
र्वाहार्थमपूर्वकल्पना कल्पितापूर्वविशिष्टाध्याहारेण यागेनापूर्वेण स्वर्गं भावयेदिति वाक्यार्थप्रतीतिः

न॰ वा॰ पश्चादपूर्वं भावनेति कर्तव्यतारूपेणांगानामपूर्वान्वय इति स्वीकारादिति चेन्न सत्यं यत्रापूर्वार्थितयांगानामनु
२० ष्ठाने स्यांगचिकीर्षया: फलरागाधीनत्वं न हीयत्नेन हि यत्ने न हि तन्मत्वे विधिसिद्धिरेव विधेः फलमिति तदर्थ
मंगानुष्ठानं किं त्वपूर्वं विना स्वर्गादि फलं न सिध्यतीति परंपरया फलरागाधीनमेव तदनुष्ठानं । तस्याक्रत्व
र्थपशुसंज्ञपनहिंसात्वाभ्युपगमे न हिंस्यादिति निषेधविषयत्वमनिवार्यमिति तद्व्यावर्त्तकविशेषणाच त्वं
भावात्तदनुमानं तावदप्रयोजकमेव । अत एवमदनुमानं नाप्रयोजकं क्रत्वर्थमारप्यासहिंसिधात्वर्थ
20 त्वेन स्यानिषिद्धत्वप्रसंगस्य विपक्षबाधकस्य सत्वादिति । अथ पंचमी । लाघवान्मदुक्तमावं हिंसिधात्वनुप्रवृत्ति
निमित्तं क्रत्वर्थमारणस्य हिंसात्वेपि न हिंस्यादिति निषेधीन प्रसज्यते । स हि निषेधः श्री[redacted] प्रवृत्तीतिवाच्यपुरु राम॰
षार्थहिंसाव्यावर्तनेन न निर्वृत्तः क्रत्वनीयविलंवितोपस्थितिकक्रत्वर्थहिंसां न स्पृशति । तथाहि न हिंस्यादित्यत्र पु २०
रुषार्थैव हिंसां धात्वनुमानृपतेन क्रत्वर्थापि कुतोत्रा व्याप्तमाच्यत्व पक्षे समानपदीक्रया हिंसाया तद्विषयत्वप्रतीते ५

तस्मात्प्योतवाच्यभावनाक्षेप्यत्वपक्षेपितदाक्षिप्तकर्तृशेषत्वप्रतीतेः नात्रक्रतोशाचकंकिंचीदृत्तियेनायाया
तोग्निमग्निष्टोमेनानुयजंतीत्यनारभ्याधीतवाक्येथयेयजिशब्दोन्तयागशेषत्ववरस्याः क्रतुशेषत्वमवगम्येमन्ना
विक्रतौत्तक्षेयत्किंचिद्वृत्तियेनयएगायाः जुह्वाहिमक्रतुशेषत्वमिषाप्स्याः क्रतुशेषत्वमवगम्येतनत्वप्रवार
णोनक्रतोर्विपरिहृतिवृत्तियेननान्तरं वदेदिति दर्शपूर्णमासप्रकरणाम्नातवाक्येनूयमानस्यानन्तवदन्यस्ये
चक्रत्वर्थत्वप्रतीतिर्भवेन्नतस्मादिह हिंसाधातनानुवादाशीघ्रप्रतीतायाः पुरुषार्थहिंसायाइतितस्याएवनि
षेधोनक्रत्वर्थायाः शास्त्रशक्तिसाम्येविशीघ्रोपस्थितिकस्यशकास्यवाक्यार्थत्वयोनदितत्वंविनोपस्थितिषक्यस्येतिहि
न्यायमर्यादाश्रुतएवदर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेत्यधिकारवाक्यगतपूर्णमासपदेनोत्पत्तिवाक्यस्थ
तयोर्णमास्यांमावास्यायामग्नेपान्नीषोमीययागयोरेवमटितिप्रत्ययमित्ताद्वगतश्चीघ्रोपस्थितिकयोः फलान्वयः
स्यात् उपांशुयाजमन्तरायजतीति पौर्णमास्यांकर्तव्याग्नेयान्नीषोमीययागद्वयान्तरालेविधा

नादर्शसिद्धपौर्णमासीकालस्येति प्रवृत्तिनिमित्तानवगमात्प्राथिल्यं विनोपस्थितिकस्य फलान्वयो न स्यात्।
शीघ्रोपस्थितिकपौर्णमासीकालसंबन्धस्य यागद्वयस्य फलसंयोजनेन याकम्बादितात्पर्यादिति उपांशुया-
जस्याविशिष्टपौर्णमासीकालत्वेनेति प्रवृत्तिनिमित्तावगमाच्छीघ्रोपस्थितिकत्वमित्यर्थमेवान्तरा-
लविधित्वमर्थलभ्ये उपांशुयाजस्य पौर्णमासीकालसंबन्धे ज्ञातत्वे न मध्ये पौर्णमावास्यायामेव नाग्नीषोमीयांशुपौ-
र्णमास्यां यजन्तीति तत्र स्व विधिरपेक्ष्यत इति॥ अथ षष्ठी। यत्र प्रवृत्तिनिमित्तावगतो यो प्राथिल्यं वा विशेषः त-
च्छीघ्रावगतप्रवृत्तिनिमित्तस्यैवार्थस्य पाश्चात्यान्वयो नान्यस्येति नियमः। अत एवोपांशुयाजप्रवृत्तिनिमित्ताव-
तिर्देश्यसामान्यस्य अर्थप्रयुक्तकालविधिरपेक्ष्यतो यत्र तु प्रवृत्तिनिमित्तावगतिशीघ्रप्राथिल्यं वा विशेषाभावे पि तुल्य-
कालावगतिकेष्वेव प्रवृत्तिनिमित्तकोटौ स्थिते योर्थे पुरुषार्थत्वादि विशेषावगतो प्राथिल्यं वा विशेषो-
त्ति तत्रैकेन विशेषेणाक्रान्तस्य पुरुषार्थस्यैवाशीघ्रावगतीतिकस्यैवावाक्यार्थोन्वय इति नास्ति नियमः। अन्यथाप

यदाहवनीये जुहोतीत्यनारभ्याधीतवाक्येष्वाख्यातोपात्तभावनाक्षिप्तकर्तृशेषतया पुरुषार्थानामेव होमा
नामाहवनीयविधिः न क्रत्वर्थानां नारिष्टहोमादीनामित्यापन्नेः एवं न्यायस्थितो हिंसिधातुप्रवृत्तिनिमित्तस्य
क्रत्वर्थसंज्ञपनसाधारण्येन तस्यापि न हिंस्यादिति निषेधगोचरत्वमनिवार्यमेवेदित्यतस्तत्राह तन्मेव हिंसि
धातुप्रवृत्तिनिमित्तमस्याभिनिर्वक्तव्यमिति॥ अथ सप्तमी। यत्र प्रवृत्तिनिमित्ता विशेषेण क्रत्वर्थपुरुषा
र्थोभयग्रहणे विधिवैरूप्यमापतेत्तत्र क्रत्वर्थपुरुषार्थयोरन्यतरस्यैव प्रकृतार्थान्वयो नान्यस्येत्यपि नियम आ
दर्तव्यः अत एवाभ्युदाने विहितस्य भक्षणादीनां क्रत्वर्थपुरुषार्थोभयविधाभ्युदानादिसंयोगेनाङ्गीक्रियते क्रत्व
र्थाभ्युदानादिसंयोगेनायुक्तत्वात्तेषां क्रत्वर्थत्वस्य पुरुषार्थाभ्युदानादिसंयोगेनायत्ततः स्वतन्त्रपुरुषार्थसाध
नत्वस्य चैकैकेन वाक्येन बोधयितुमशक्यत्वात् किं त्वभ्युदानादिसाधारण्येपि यथायथं कस्यचित्क्रत्वर्थसंयोगादे
व कस्यचित्पुरुषार्थसंयोगादेवेति उभयस्याङ्गीक्रियते तथा हि प्रजापतिर्वरुणायाश्वमनयत्स स्वां देवतामार्छत्

न॰वा॰
२२

स्य पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत् तन्निरवपत् ततो वै स वरुणपाशादमुच्यत वरुणो वा एतं गृह्णा
ति योऽश्वं प्रतिगृह्णाति यावतोऽश्वान् प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेदिति विहिताश्वदाननिमि
त्तेष्टिः कृत्वर्थाश्वदाननिमित्ता पुरुषार्थाश्वदाननिमित्ता वेति संशये षोडशिकादिष्वन्वहं द्वादश शतानि शतानि दद्या
स्याश्वसहस्रमुन्नमद्ध्यादिवाक्यैः क्रतुक्रतुदक्षिणारूपाश्वदानस्य विहितत्वेनादुष्टत्वान्न तस्मिन् दोषसंकी
र्त्तनं नान्येति सुहृदादिभ्यः क्रियमाणस्य पुरुषार्थाश्वदानस्य विहितत्वेनादुष्टत्वात् न तस्मिन् दोषसंकीर्त्तनं नान्ये
ति सुहृदादिभ्यः क्रियमाणस्य पुरुषार्थाश्वदानस्य न केसरिणो ददातीति प्रतिषिद्धत्वेन दुष्टत्वात्तत्र दोषसंकीर्त्तन
मन्येति अत एतस्तद्रूपाल्लौकिकाश्वदाननिमित्तेयमिष्टिरिति दोषाविष्टिलौकिकेष्वेच्छात्राद्वैदिकेन दोषः स्या
दिति सत्त्वेण पूर्वपक्षं कृत्वा लौकिकं वैदिकं वाश्वदानं कुर्वतो वरुणग्रहशङ्कोऽजलोदरख्याभुपनियातादृ
शीनां दोषसंकीर्त्तनमिदं यथा वरुणग्रहे सति तद्धूमो चनसाधनमवश्यमनुष्ठेयं एवमश्वदाने कृतेऽसत्यपि ... एम॰
२२

22

रित्येव कर्तव्यतापरदृष्टां तामेदोष धारयदर्थवादमात्रं। अतोनन्न दृष्टा ह्लो कि काम्यदान निमित्तेषु सिद्धिः किंतु वैदिका
इष्टे वैदिकमेव निमित्तं शुद्धिस्थं भवतीति शुद्धिसंनिधि लक्षणस्यानुमाणानुसारात् क्रत्वर्थत्वे क्रतुफलातिरे
केण पुरुषार्थत्व इव फलान्तरं न कल्पनीयमिति लाघवात्सारा द्वै वैदिकाम्यदाननिमित्ते से व मर्थवादो वानुप
यातात्। तस्मा[illegible]ध्यन्नेषु नीयेनेति हस्तेणसिद्धं तितं। तथा न स्मात्सुवर्णं हिरण्यं भार्यं दुर्वर्णोस्य भ्रातृव्यो भवती
ति विहितं हिरण्यमरणं क्रत्वर्थं पुरुषार्थं वेति संशये क्रत्वर्थत्वेन हिरण्यसंस्कार्यताप्रतीतेः क्रतुदक्षिणादि
रूपस्यैव हिरण्यस्याप्येवं विनियोगसद्भावेन संस्कार्यत्वोचितात्। क्रतौ क्रतुफलव्यतिरेकेण फलान्तरस्याकल्पनीय
त्वेन लाघवाच्च क्रत्वर्थमित्येवं पूर्वपक्षे कृते सिद्धान्तस्तस्येन फलभागित्वमात्रप्रतीतावपि संस्कार्यत्वानवगतेः का
र्यान्तरदर्शनेनैव संस्कार्यत्वस्यावगन्तव्यत्वात् तत्प्रकरणाधीनेषु कार्यान्तरानवगमात् न संस्कार्यताधीवलेन क्रत्व
र्थता॥ किंतु रात्रिसत्रन्यायेनार्थवादिकफलविपरिणामाः क्रतफलसद्भावेन क्रतूपकारफलस्याकल्प्यमया

न. वा.
२३
23

पुरुषार्थमेवेत्यप्रकरणेतुतद्धर्मस्ततो विशेषादिति सूत्रेणासिद्धांतितमेवमाषाधिकरणेप्युक्तक्रत्वर्थपुरु
षार्थं वेत्येवं विचारमवतार्य यथान्यायं क्रत्वर्थंपुरुषार्थं वा निर्णीतं न तु क्रतुपुरुषोभयार्थमिति क्वचि
न्निर्णीयः कृतो क्तिनवाजपाक्वचित्संशयकोटिमात्रोदाहरणमक्तिात क्रतुजः लौकिके पुरुषार्थत्वं वैदिके
क्रतुशेषत्वमिति वैरूप्यापत्तेः एवमिहापि निषेधस्य क्रत्वर्थपुरुषार्थोभयविधिहिंसासंयोगेनास्यापि तदुभय
रूपता आपद्यत इत्येकेन च वाक्येन तदुभयरूपबोधनस्याशक्यत्वादन्यतरांशयोग एव स्वीकर्तव्ये पूर्वोत्त
त्साशीघ्रप्रतीतीति क्रतुपुरुषार्थहिंसासंयोग एवायद्वयः न चैकस्यैव द्वध्यः खादिरत्वस्य च क्रत्वर्थत्वं पुरुषार्थत्व
च दृष्टं न त्वेहापि स्यादिति वाच्यं दध्ना जुहोति दध्नेन्द्रियकामस्य जुहुयात् खादिरो यूपो भवति खादिरं वीर्यकामस्य राम.
यूपं कुर्वीतेति तयोः क्रतुपुरुषसंबंधबोधकवाक्यभेदसत्वात् इहैकवाक्येनाहिंसासामान्यनिषेधस्य क्रत्वर्थहिंसां २३
शे क्रत्वर्थत्वस्य पुरुषार्थहिंसांशे पुरुषार्थत्वस्य च बोधयितुमशक्यत्वात् न च तत्रैकवाक्येन प्रत्यंशग्रहणमिति प्रकारप्रद

रणाविधायकमेववाक्यं कल्प्यते नस्य च क्रत्वर्थत्वं पुरुषार्थत्वं चेत्युभयमप्युपगम्यते यथेडापि स्यादिति वाच्यं
न चोक्तेन वाक्येन दर्शपूर्णमासवाक्यैकवाक्यतापन्नेन क्रत्वर्थबोधनेन तृतीयाश्रुति विनियुक्तायुरादिफ
लसमाख्यानेन पुरुषार्थत्वस्तुत्क्रतुवाक्यमेकवाक्यतान्यथानुपपत्तिकल्प्येन वाक्यान्तरेण पुरुषार्थत्वबोधन
मिति तत्रापि वाक्यभेदस्तदवस्थ इत्यत कल्प्यभेदे वाक्यभेदाभावादिति। [illegible]थापरमी। हिंसानिषेधवा
क्यस्य क्रत्वर्थपुरुषार्थोभयविधहिंसासंस्पर्शमात्रेण नस्य क्रत्वर्थहिंसांशे क्रत्वर्थता पुरुषार्थहिंसांशे पु
रुषार्थतेति हेतुद्वयं न प्रसज्यते येन तदुभयबोधने वाक्यवैरूप्यमापद्येत क्रत्वर्थपुरुषार्थोभयविधहिंसानि
षेधस्यापि पुरुषार्थत्वोपपत्तेः न हि क्रत्वर्थत्वेन संबन्धद्वयं विधीयते तत्सर्वं क्रत्वर्थमिति नियमः गोदोहनेन प
शुकामस्य प्रणयेत् इति दर्शपौर्णमासिकप्रणयनाश्रितत्वया विधीयमानस्य गोदोहनस्य पुरुषा
र्थत्वदर्शनात् न च क्रमिपदसमभिव्याहाराभावे क्रत्वर्थसंबन्धितया विधीयमानस्य क्रत्वर्थतेति नियमः अ

नतिदृश्नं स्तृणातीत्यनतिदृश्नमेवैनं प्रजया पशुभिः करोतीति दार्शपौर्णमासिकस्तरणाश्रितत्वेन वि
धीयमानायास्तरणीयमूल्यदर्शनायाद्कबर्हिनि विडुताहृणायाश्चानतिदृश्नतायाः पुरुषार्थत्वदर्शनात्।
लिप्सा। सूत्रे हि द्वितीयं वर्णके गोदोहनवदनतिदृश्नतापि हि पुरुषार्थोदाहरणत्वेन शाबरस्वामिना लिखिता तत्र
च प्राभाकरैरङ्गेषु फलश्रुतिरर्थवाद इति पर्णतार्थवादन्यायस्थमप्रमाणं यस्य पर्णमयी जुहूर्भवति न स पा
पं श्लोकं शृणोतीत्युभयोरपि पर्णताऽपापश्लोकश्रवणयोर्वर्तमानापदेशेन तुल्यकालतया प्रतीतेः तुल्यका
लयोश्च कार्यकारणभावायोगाद्धि धीयमानपर्णताप्रशंसार्थमपापश्लोकश्रवणमर्थवादस्तरणीयमू
मेवानतिदृश्नताया यजमानस्य प्रजया पशुभिरनतिदृश्नतायाश्चेति भिन्नयोरुभयोरभेदोपचारस्याप्युपपन्नत्वमि
ति वक्तव्यं कार्यकारणभावसंबंधमुपचारनिमित्तमन्तरेणानुपपत्तेस्तयोः कार्यकारणभावो विवक्षित इति पर्ण
तावैयर्थ्यप्रदर्शनेन न तत्समर्पकत्वं तत्र च यत्र विधेयफलाभेदव्यपदेशो विनाश्रितत्वं क्रत्वर्थसंबंधितया वि

धीयमानस्य क्रत्वर्थत्वेनेति नियमः ओमित्येतदक्षरमुद्गीथमुपासीतेत्यादिवाक्ये सौमिकोद्गीथाद्याश्रितत्वेन वि
धीयमानानामुपासनानामप्यनाहितवेदकामानां भवतीत्यादिवाक्यशेषश्रुतकामाप्तिक्रतुफलाप्रतिबंधादि
फलार्थत्वदर्शनात् तन्निर्द्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबंधः फलमिति ब्रह्ममीमांसासूत्रेऽपि प्रतीताफ
लार्थवादस्याप्यसाम्यमुपासनाफलार्थवादानामाशंक्य पर्णताया जुहूसंबंधे यथापापरूपतया फलजिप्या
दकत्वं न स्यादिति तस्मिन् द्रव्ये क्रत्वपूर्वानुगतान्यपापरूपतापादपि जुहूलिंगेन क्रतुमुपस्थाप्य तत्संबंधबोध
कशब्दः कल्प्यते जुहूशब्दस्यैव वा जुहूसंबंधिनि क्रतौ लक्षणा कल्प्यते ते कल्पने प्रतीतजुहूद्वारकक्रतुशे
षत्वनिर्वाहार्थेति स्यात् क्रत्वपूर्वफले कल्पनमावश्यकमिति तत एव फलपर्यवसानं संभवतीति नोद्गीथाद्यु
पास्यापि तत्क्रतुसंबंधबोधकशब्दकल्पनादिकमपेक्ष्यते न स्याज्ज्ञानामसंज्ञात्प्रतीतक्रतूपकारफलकल्पनाद्युमर्थ
वादप्रतीतफलविपरिणामकल्पना युक्तेतामांपुरुषार्थत्वात् क्रतुध्यनियमः अत एव तेनोभौ कुरुतः पश्चैतदेवं वेद

पक्षेचैवंनवेदेतिवाक्यशेषेणोपवर्तेषुनासामनियमोदर्शितः इतितन्मायवैषम्यमुक्तं तस्मात्क्रत्वर्थत्वेनप्रतीतंप्र
तिषेधत्वेनविधीयतेनक्रत्वर्थमितियमश्रुतएवशाबराकरैर्निरूपणावगुणफलेष्टावश्वदानस्ययोऽश्वंप्रतिगृह्णा
नीतिकत्पायच्छष्णुक्रवाक्यस्यस्वप्रतीतयानिमित्ततयाकेवलमन्वयेक्रत्वर्थत्वंनविशिष्टतिशेषतयाप्यन्व
येचनिन्द्यविरोधः नचेत्तरि। — विधायकवाक्यानारभ्याधानत्वेश्वदानस्यक्रत्वर्थत्वप्रत्यायकंकिंचिद
स्तिप्रकरणातः क्रत्वपूर्वविपरिवृत्त्यसमवात्वैदिकस्यवैदिकमेवनिमित्तमितिनियमस्यक्षामवत्यादि
श्रुत्यभिवाशात्श्वदानमात्रस्यनिमित्तत्वंप्रतिपाद्यतोयोऽश्वंप्रतिगृह्णातीतिवाक्यस्यउद्दिष्टंनिधानदृष्टस्यान
प्रमाणेनसंकोचायोगात्चनचाश्वदानस्यपरिणामवदव्यभिचरितक्रतुसंबंधात्तियेऽश्वदासहतेसूर्यलोका
दिष्टतिप्रतियज्ञानांसूर्यस्यापुत्रादिफलानांवैदिकानामिवारिभ्यः क्रियमाणानांलौकिकानामश्वदानानांबहु
लमुपलंभात्तस्माल्लौकिकवैदिकसाधारणेनाश्वदानमात्रेनिमित्तेपुरुषार्थतयोपमिष्टिरावश्यंकार्येतिसिद्धं

न् न तु क्रत्वर्थं तयेति होमादौ । इति दिक्स्याधिकरणे क्रतुक्रत्वर्थत्वनिर्वाहार्थमियमिष्टिरप्यस्य हस्त रक्षिता भवतीके
उरीक्रियत इति कृत्वा चिंतयेदमकृकारणमित्युक्तं प्रक्रत्वर्थं व्यापत्तिनिमित्ततया विधीयते न तद्वपित आ
पत्तिप्रयुक्तं तु वैकल्यसमाधानार्थं तया क्रत्वर्थमेव भवति यथा भिन्ने जुहोतीति यात्र भेदनिमित्तविहिते हो
मः न चेह तथा न हिंस्यादिति वाक्ये हिंसायाः क्रत्वर्थत्वापादकं प्रकरणमस्ति न वा हिंसानिषेधेन तस्याः प्रोषि
त्वेन तस्याः पत्ते निमित्तत्वेनान्वयोऽस्ति तस्मात्स्ववृत्तिनिमित्तानुसारात् लौकिकवैदिकसाधारण्येन हिंसात्रस्य
निषेधः क्रियत इति स्यान्नाय यदि क्रत्वर्थपशुसंज्ञपनमपि हिंसा स्यात् । अतस्तस्या वृत्तमेव हिंसापदप्रवृत्ति
निमित्तं वाच्यमिति अथ न वेमी निषेध्यनिषेधयोः क्रत्वर्थपुरुषार्थत्वविषये कल्पे अस्ति नियमः अतए
व दर्शपूर्णमासप्रकरणाम्नातेनानृतं वदेदिति वाक्ये प्रकरणवलान्निषेध्यनिषेधयोरुभयोरपि क्रत्वर्थीया
त्वादिति क्रतुप्रयोगिद्रव्यादिसंपादनार्थतः । यार्थगतं क्रत्वर्थमेवानृतवदनं निषेध्यं । तन्निषेधोऽपि क्रतोरं

न॰वा॰
२६
26

नं न पुरुषार्थः तेन क्रत्वर्थान् नञ्जनवदने तदंगभूतनिषेधातिक्रमात् क्रतोर्वैगुण्यं दर्शपूर्णमासमध्ये यदि पुरु-
षो नञ्जनवदने यो नाम क्रतुमध्यस्थः कलंजादीनि भक्षयेत् तदा क्रतोस्तस्य वैगुण्यं यथा चोदितसिद्धिर्न इति न्या-
क्रतोर्न वैगुण्यं किं तु पुरुषस्य प्रत्यवाय इति निर्णीतं कर्णपिकाणो मलवद्वाससा न संवदेत न सहासीत ना-
स्या अन्नमद्यादिति दर्शपूर्णमासप्रकरण एव आम्नाते पुवाक्येषु निषेधानां निषेधानां वानृतवदननञ्निषेध-
वत् प्रकरणबलात् क्रत्वर्थत्वमाशंक्य यस्य व्रत्यहस्तस्य नालंभुकास्यात्तामपरुध्य यजेतेति मलवद्वाससः श्र-
मो सर्वात्मनोदासीनकरणात् प्रत्यवायस्य विहितत्वात् तया संवादसहासनेन प्राप्तः तत्स्नानादनत्वंथो रव-
ल्यादुरभ्यंजनं वा वस्त्रिया अन्नमभ्यंजनमेव न प्रतिगृह्यमिति अभ्यंजनादृष्टस्त्रीसंगतिरूपतया व्याख्यानत्वा-
त् कथमपि न प्राप्नोतीति पुरुषार्थानामेव सवादादीनां निषेधत्वात् निषेधा अपि पुरुषार्था इति निर्णीतं शाग परो-
धान्मलवद्वाससस्पृष्टिवेकारणो तथा पात्राङ्गरागावगहेनं तेन यातयामायां निहन्तस्स्वहस्तेनामानतयायोलो हि

तं कारवद्यावत्तः प्रसक्तं यथा प्राप्तं न संगृहेत्तावत्तः संवत्सरमित्यन्तलोकं न प्रजानादिति तस्माद्ब्राह्मणायना
यं गुरे च निहन्यात्तलोहितं कुर्याद्यावन्तो हेतस्मा भवन्तीति दर्शपूर्णमासप्रकरणे एवं श्रुताः निषेध्या निषे
धाश्च प्रकरणात्क्रत्वर्था इति दर्शपूर्णमासयोरार्त्विज्यार्थमन्वाहार्यमात्रेण वा प्रणानामनानतो तदानीमे
ते क्रतुनिर्वृत्त्यर्थतया प्राप्तास्तेषामयुधोद्यमनादिरूपा अवगोरणादयो निषेध्यास्तन्निषेधाश्च दर्शपूर्णमा
सयोरंगभूता इति पूर्वपक्षं कृत्वा स्ववाक्य एवावगोरणादीनां शतयातनादिफलकीर्तनेन तत्परिवर्जनानां
शतयातनादिपरिहारार्थत्वप्रतीतेः स्ववाक्यगतेनैव फलेन फलवत्त्वसंभवे प्रकरणालोचनालभ्यक्रतूपका
रफलकल्पनानौचित्यात्प्रकरणादुत्कृष्टैरेतैर्वाक्यैः पुरुषार्थानामवगोरणादीनां पुरुषार्था एव निषेधाः
क्रियान्त इति सिद्धान्तितं शयौ सर्वपरीहारानादिसाधिकरणे एवं सर्वत्र निषेध्यनिषेधयोः क्रत्वर्थपुरुषार्थविषये
का नियमो द्रष्टव्यः तेन एवं च न हिंस्यादिति निषेधस्य क्रत्वर्थपुरुषार्थभयविधिहिंसानिषेधत्वरूपत्वे स्वयमप्य

न०क०
२७
27

यं क्रत्वर्थपुरुषार्थोभयरूपो भवतु तस्य क्रतुपुरुषसंबंधबोधनार्थं वाक्यभिंधादिति तस्य विहाराद्यर्थं शीघ्रप्र
तीन पुरुषार्थहिंसामात्रस्यैव निषेध्यत्वमंगीकरणीयमिति। अथ दशमी। अस्ति हि द्वैयं निषेध्यनिषेधयो
रुक्तप्रकारैकरूप्यनियमः ज्योतिष्टोमप्रकरणे न ददाति न जुहोति न पचतीत्याम्नातानां पुरुषार्थदीनहो
मपाकप्रतिषेधानां क्रत्वर्थत्वस्य दर्शमाध्याये व्यवस्थापितत्वात् तत्तत्कर्मविशेषप्रकरणाम्नातानां स्तु
पगमनमीसभक्षणादिरूपपुरुषार्थनिषेधानां स्तुपायमांसभक्षणादिपुरुषार्थमपि प्रितः प्रतिषेधः क
तोरंगमिष्टः प्रकरणत्रयादिति व्याकरणाधिकरणे वार्त्तिककृतोक्तत्वाद्यजतद्व क्रत्वर्थप्रतियोगिक
निषेधस्यापि पुरुषार्थत्वं संभवतीति क्रत्वर्थसंज्ञपनस्य पुरुषार्थनिषेधाविषयत्वसिध्यर्थं तद्भावर्त्तमेव हि
सापदप्रवृत्तिनिमित्तं वाच्यमिति। अथैकादशी। निषेध्यनिषेधयोः क्रत्वर्थत्वपुरुषार्थत्वविषये रूप्ये बुद्धि
गौरवाल्लाघवानुरोधेन पुरुषार्थस्य निषेधः पुरुषार्थः क्रत्वर्थस्य च निषेधः क्रत्वर्थ इति तद्वैरूप्यनियम

राम०
२७

त्वाद्वैधोत्सर्गिकः एवं क्रत्वसोत्सर्गस्य बाधकवत्तिस्थले स्यागेऽप्यन्यत्र सागो न युज्यते। द्वितीयनियमस्य क-
श्चिद्बाधो यन्निपातेन सागोऽपि न दृश्यते। एवं वा हिंसायां त्वेण पुरुषार्थहिंसायाः पुरुषार्थो निषेधः क्रियत
इति अनारभ्याधीततया सर्वसंप्रतिपन्नत्वात्स्थिते तेन क्रत्वर्थहिंसाया अपि निषेधः क्रियत इत्युपगमे त-
न्निषेधोऽपि क्रत्वर्थः स्यादिति वाक्यवैरूप्यपरिहारार्थं क्रत्वर्थपुरुषार्थान्यतरहिंसानिषेध एव वाक्यार्थ इत्यसं-
गी कर्तव्ये स्मीप्रोपस्थितपुरुषार्थनिषेध एव वाक्यार्थः पर्यवस्यतीत्यतिप्रसंगाभावान्न क्रत्वर्थहिंसाया हन्त-
हिंसिधातुप्रवृत्तिनिमित्तं वाच्यमिति। अयद्वादशी। आद्यनियमः कथंचिदौत्सर्गिको वा भ्रुत्वेष्टितुं शक्यः द्वि-
तीयनियमस्त्वौत्सर्गिकोऽप्यसिद्धः दूरे तस्याव्यभिचरितत्वं न हि हृद्यस्य पुरुषार्थनिषेधानां क्रत्वर्थकत्वं चित्प्र-
तियोगितानियमस्यौत्सर्गिकस्याभ्युपगन्तव्यत्वात् न च तदसिद्धिः अयगोरणादिनिषेधानां पुरुषार्थानां नि-
षेधकौरौ क्रत्वर्थानामप्ययगोरणादीनामनुप्रवेशावश्यंभावात्। अन्यथा अनृतवदनवत्क्रत्वर्थतयाप्रस

न॰ वा॰
२८

28

क्तामामयगोरणादीनां पुरुषार्थनिषेधे निषेध्यकोटावनुप्रवेशात् अंगीकारे क्रतुनिर्हेत्यर्थश्चा ब्राह्मणायगो-
रणादिषु स्यादुभयत्र संगानं तस्मात्क्रत्वर्थत्वेन पुरुषार्थत्वेन वा प्राप्तो अयगोरणादयः प्रसक्तास्तेषां सर्वे-
षां पुरुषार्थतया निषेधस्तस्माद्ब्राह्मणाय नायगुरेत् इत्यसाद्विवाक्ये क्रियत इत्येवं शास्त्राधिकरणार्थनिर्णी-
यश्चा[illegible]यः अत एव सर्वपरिहारादिति सिद्धो हेतुः सर्वेषां सर्वविध्यागमानां अथयगोरणादीनां प्रति-
षेधादिति भाष्यकारेण व्याख्यातः एवं च प्रागपरिधानमलवद्वाससइत्यधिकरणे पुरुषार्थतया निर्णी-
ते मलवद्वाससः संवादनिषेधे यन्नादिसंगोपि न क्रतूपयोगि द्रव्यनिधानस्थलादिपरिज्ञानोपायतया क्र-
त्वर्थत्वेन प्राप्तस्यापि मलवद्वाससापरस्यान्यथा वा सहसंवादस्य निषेध्यकोटावनुप्रवेशो वाच्यः अन्य- रम॰
थानतस्यानृतवदनस्येव क्रत्वर्थनिषेधाभावादस्य निषेध्यकोटावनुप्रवेशो वाच्यः अन्यथानतस्यानृतवदन- २८
स्येव क्रत्वर्थनिषेधाभावात्पुरुषार्थनिषेधेनापि तदसंस्पर्शे कदाचित्क्रत्वर्थतया तदनुष्ठानापत्तेरनेने

वत्स्यायेन पुरुषार्थस्य हिंसानिषेधादिषु क्रतूपयोगिद्रव्यसंपादनादिप्रतिबंधकत्वा(त्) व धादीनामपि
निषेध्यकोटावनुप्रवेशो वाच्यः ॥ तथैव क्रत्वर्थत्वाविशेषात् पशुसंज्ञपनस्य हिंसात्वेन सापि निषेध्य
कोटावनुप्रवेशः स्यात् तस्माद् दृष्टमेव हिंसाधातुप्रवृत्तिनिमित्तं वाच्यमिति । अथ त्रयोदशी । क्रतुनि
ष्ठेऽसर्थमनुष्ठेयत्वेनायतनत्वं द्विविधमस्ति एकं लोकतः प्राप्तमनियतोपायरूपविध्यंशस्पर्शी क्रतोरंगं
केवलं तदुपकारकं क्रतूपयोगिद्रव्यादि तादृशावस्था विशिष्टस्य पुरुषस्य विशेषणभूतं यथा द्रव्यसंपादना
र्थमनृतवदनमलक्षणः संवादादिश्च्यमदेदिकविधिसंस्पृष्टक्रत्वंगभूतं यथा । तस्य संज्ञपनादितत्त्वा
यं पुरुषार्थनिषेधेषु निषेध्यकोटावनुप्रविशति स्वयमपि पुरुषार्थत्वादनृतवदना, दिकं विना द्रव्यसंपा
दनादिरूपार्थान्तरसद्भावाद् द्वितीयं तु न प्रविशति क्रत्वंगत्वाविहितत्वस्य नियतोपायस्य सांगे विधिविहितोपात्तेः
क्रतोरनिर्वृत्तिप्रसंगात् । अन्यत्रानृतवदनस्य क्रत्वंगस्यैव निषेधः कर्त्रधिकरणेऽङ्गीकृतः एवं हि तत्रानृतवदननि

न॰वा॰
२९
29

षेधोदाहरणं भाष्ये व्रीहिमयं संकल्प्य न यवमयः कार्य इति व्रीहिद्रव्यकेण पौर्णमासेन दर्शेन वा यक्ष्य इति सं
कल्पाभिवदनं च कृत्वांगं तत्संउदाहृतसंकल्पाभिवदनमात्रं कृत्वांगं न तु व्रीह्यलाभे न यवमु, पादायत्र अभिवदन
स्यानृतरूपत्वापादनमपि तस्यैव कृत्वंगं तस्य निषेधः तेन संकल्पितव्रीह्यलाभे तत्सति निषिद्धमुपादाय संकल्प
वैगुण्यपरिहारेण कर्त्तुं निर्वर्त्तयेदिति पर्यवस्यति तथापि मलवद्वाससोधिकरणत्वेनागस्यैव पत्नीसंवादस्य
निषेधः पूर्वपक्षे सिद्धान्ते चांगीकृतः सत्तु मलवाससः संवादनिषेधः तस्मान्मलवद्वाससा न संवदेतेति दर्शपूर्णमा
सप्रकरणगतत्वात् कार्यः पूर्वपक्षे सिद्धान्ते तु यस्य क्रतोरहनीति वाक्यात् तदर्थः न संवदेतेति वाक्ये तु पुरुषार्थनिषेध
पमित्येतावान्विशेषः। सत्यं। तत्र वचनलाद्यो दिवसे पुक्रत्वंगपत्नीसंवादादिसांगेपि नास्ति तद्दृष्टविशेषः श्रु
द्धिसमये पुष्यादितार्थीमकृत्तुसाद्गुण्यं च वचनवलात् चेत्पत्नीसंवादाद्यनपेक्ष्यैवाहरहत्रापशुसंज्ञपनस्य पुरु
षार्थनिषेधस्यापमनेनि विषयतया तद्दृष्टविशेषो दृष्टयापवदानताहिंस्येन क्रतोरविरीति श्वेस्य परिहार्यमुभयं। तन्वि राम॰
२९

हापि नैतद्दोषद्वयमापतति तथाहि न तावद्विधिनिषेधयोर्विरोधोऽस्ति विधिना क्रतुरिष्टसाधनत्वस्य निषेधे
न तदनिष्टसाधनत्वस्य च बोधयितुं शक्यत्वात्। न चैकस्येष्टानिष्टोभयसाधनत्वं विरुद्धं घृतपानादेः पुष्ट्यादिमे
हादिरूपेष्टानिष्टसाधनत्वस्य यागादेः स्वर्गादिना लौकिकक्लेशादिरूपेष्टानिष्टसाधनत्वस्य दर्शनादिति चेन्न।
तथापि न हिंस्यादिति शास्त्रस्य क्रत्वर्थपशुहिंसांशेऽननुष्ठापकत्वलक्षणाप्रामाण्यशङ्कनात्। प्रवृत्तिर्वा नि
वृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते॥ इत्युक्तरीत्या विधीनां प्रवर्तकत्वेनेव निषेधानां
निवर्तकत्वेन शास्त्रस्य समर्थनीयत्वात् न च पशुहिंसा क्रतुनिष्पत्त्यर्थकापि प्रत्यवायपरिहारार्थं वर्जनीया
वेति विकल्पाया एकतया पाक्षिकनिवर्तकत्वं संभवतीति वाच्यं तथा सति तदंशे पाक्षिकनिषेधबोधकत्वमंशा
न्तरे नित्यनिषेधबोधकत्वमिति वैरूप्यदोषस्य वैधहिंसाननुष्ठानपक्षे क्रत्वनिर्वृत्तिदोषस्य चानिवार्यत्वात्। किंच हिं
सानिषेधशास्त्रस्य क्रत्वर्थसंज्ञपनसाधारण्ये विधिनिषेधशास्त्रयोर्बाध्यबाधकविरोधोऽप्यापद्येत तथाहि इष्टसा

न० वा० धनत्वमात्रेण प्रवृत्तोपायिकं मधुविषसंपृक्तान्नभोजनादि साधारण्यान्न किंतु बलवदिष्टसाधनत्वे बलवत्त्वं
३० चेष्टोपायानुष्ठानप्रयुक्तान् सर्वविधादनिष्टादुद्वेगस्य तत्साधनस्येष्टसाधिकत्वं न च सार्थवादेषु विधिषु या
गाद्यनुष्ठानप्रयुक्तात्कालिकक्लेशादिदर्शनेन तात्पर्यमजनार्थप्रवृत्तेः स्तुत्यर्थवादैः स्तुतिनिंदार्थवादैः स्तु
30 तिरूपेण समर्प्यते निरर्थवादेषु विधेरेव तदाक्षेपशक्तिः कल्प्यते तथा च अनिष्टसाधनत्वमात्रेण निवृत्तोपायि
कं तात्कालिकक्लेशादिकरं विहितयागादि साधारण्यान्न किंतु बलवदनिष्टसाधनत्वे च बलवदनिष्टोपायानुष्ठान
साध्यादुद्वेगादिहेतोस्तदनुष्ठानप्रयुक्तसाधिकत्वं न सार्थवादेषु निषेधेषु तात्कालिकेष्टरुचिप्रसक्तप्रवृत्तिप्रतिबधा
र्थनिंदार्थवादैर्निंदारूपेण समर्प्यते निरर्थवादेषु निषेधानामेव तदाक्षेपशक्तिः कल्प्यत इति वस्तुस्थितिः एवं च क
र्त्तव्यर्थसंज्ञपनस्य निषेधविषयत्वे विधिनिषेधयोः परस्परात्मिकेष्टानिष्टसाधनत्वबोधकता विरोधोप्यनिवार्यः न राम०
स्मात्कर्तव्यर्थसंज्ञपनस्य हिंसात्वेप्युक्तदोषत्रयधिया प्रवृत्त्यर्थनिषेधोनस्यमातितत्र कर्त्तव्यत्वं निषेधः कर्त्तव्या मि ३०

ति निश्चये निश्चलेऽस्थिते वाक्यवैरूप्यमिथ्यापोडशीग्रहनिषेधस्याप्रमाणत्वात्तार्थेऽपि निषेधो न स्यादतीतिन तज्ज्ञाप्यार्थ
त्तहीति धात्वर्थवृत्ति निमित्तकल्पना क्लेशो नुभवितव्य इति निषेधवाक्यानां निवर्तकत्वेनैव शास्त्रत्वमिति नायं निय
मः अस्त्येव हिंसानिषेधशास्त्रस्य पंचसूनाख्यानमनां तदीयकहिंसानिवर्तकत्वाभावात् अतोऽस्य यथा तदंशे पंचसूना
गृहस्थस्य चुल्लिपेषण्युपस्करः कंडनी तोयकुंभश्च बध्यते यास्तु वाहयन्। आसां क्रमेण सर्वासां निष्कृत्यर्थं महर्षि
भिः। पंचक्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनामिति स्मृत्युक्तत्वादयमोदकं पंचमहायज्ञप्रवर्तकत्वेन शास्त्रत्वं एवं वैधपशु
संज्ञपनांशेऽपि तत्तत्प्राणिवधोपदिष्टयागप्रवृत्तिप्रवर्तकत्वेन शास्त्रत्वं निर्व्यूढं भवेत् यदि तस्य हिंसात्वमभ्युपगम्येत अतो
न तावत्तस्य हिंसात्वेन द्विधिनिषेधयोः प्रवर्तकत्वनिवर्तकत्वयोर्विरोधः अत एव न क्रतुनिवृत्तिदोषप्रसंगोऽपि निषेध
स्य क्रतुसंज्ञपनांशे निवर्तकत्वाभावात् तानापि तयोर्वैध्यविरोधः यतो निरूढोऽपयिके अनिष्टसाधनत्वेनुपवित्रं बलव
दनिष्टं वृद्धिविधयकमिष्टापेक्षयाऽधिके दुःखप्राप्तेः पूर्वमवश्यंभाविश्च गुरुलघुपापद्वयसाध्यफले गुरुपापानुष्ठानप्र

न·वा·
३१
31

युक्तः लोकः शास्त्रादिरूपमिष्टसाधनेः पूर्वं गुरूपायानुष्ठाने वश्यंभाविश्रमपरिमिष्टापेक्षयाऽधिकं मिष्टसाध्यमनंतरभावि
दृष्टोपायाद्धिकक्लेशसाध्येनोपायेन परिहर्तव्यमितरदिष्टसाध्यनंतरभावीष्टापेक्षयान्यून।मिष्टसाध्यपाया
ल्पसुखोपायेन परिहर्तुं शक्यमेतत्सर्वमनुष्ठातृपुरुषाननुमतत्वेनांगीकृता हानिर्न दोषायेतिन्यायाविषयमपा
जिहासितत्वान्न बलवदनिष्टमुच्यते। यदिष्टसाधनेः पूर्वभावीष्टापेक्षयाल्पं यदिष्टसाध्यमनंतरभाविश्रमल्पतरत्वेन स
त्यंतयानुमतं तदुभयं न बलवदनिष्टं बुभुक्षोः पूर्वभाविपाकादिक्लेशस्यानुसंधानेप्यनंतरभाविसैरसंचा
रविरोधिग्रासाद्यनुसंधानेपि तदुभयानुमतत्वात् कथमन्तिमाद्यदिष्टभोजनांते व्यापारे प्रवृत्तिदर्शनात् बल
वदनिष्टे सापत्न्ययं निवृत्तिप्रयोजकं नम्रुचकुर्थं तनु स्वपरिहारोपाये प्रवृत्तिप्रयोजकं। न खलु मूषिकग्रहणा
र्थं गिरिविवरखजने। निर्बाधलघुमार्गवतः पुरादेः शास्त्रार्थं वाधगुरुमार्गगमने मरणा यपर्यवसायितिमधुविष
संपृक्तान्नभोजने वा कश्चित्प्रवर्तते प्रवर्ततेत्वतिरूपाद्रोपशिनो किंचिदधिकभोजनेनात्यप्रयुक्तमजीर्णादिकल राम·
३१

पुनाप्रवृत्तिविषोधेन समाधास्यामीति एवं च निषेधवाक्ये निषेध्यस्यानिष्टसाधनत्वेन बोध्यमाने यस्य
तिषेध्यमानेयस्य निषेध्यस्यानुष्ठानेन प्रसक्तस्यानिष्टस्य यथाभूतं बलवत्त्वं तथाभूतमेव तत्तदनुष्ठानेन तज्ज
न्यविहितार्थवादैर्लब्धस्तत्पापस्य समर्थ्यते निषेधैरेवाक्षिप्यत इति हिंसानिषेधवाक्येन ब्रणास्तमपि हिंसानाम
निष्टसाधनत्वे बोध्यमाने तदर्थवादस्तन्मूलकाक्षेपो वा कल्पतुं संज्ञपनादौ तद्विध्यविरोधायपयन्नत्वेनानिष्ट
स्य चतुर्थस्वर्गस्य बलवत्त्वे पर्यवसेनेन हीष्टस्यानिष्टस्य वा बलवत्त्वमेकरूपमेव बोधनीयमिति नि
यन्तुं शक्यते श्येनादिविधीनां शास्त्रमात्रप्रयुक्तमाविनरककरूपाधिकानिष्टावहत्वंभावेन तद्विरोधायस्ये
न यागानुष्ठानेष्टतानिष्टस्वादनिष्टाद्यधिकरूपमर्थपरित्यज्यानुष्ठाने क्लेशादिमात्रादिष्टस्याधिकं पर्य
सानस्यवक्तव्यत्वान्नत्वतः क्रत्वर्थसंज्ञपनस्य हिंसात्वेऽतिनिषेधाविधाक्रमप्रयुक्तदुरितानुबंधित्वस्यापरिहार्यत्वा
त्तत्स्य तदनुबंधित्वमिच्छद्भिर्भगवद्भिरुदयनपादैः तानुसारिभित्तिशाखातत्रैव विशिष्टिहि धानुरक्तृत्ति मिश्रकस्यापि मिति।

अथ पंचदशी निषेधशास्त्राणां निवर्त्तकत्वं नावदोत्सर्गिकं तदबुद्धिपूर्वकात्तामादिकान्निवर्त्तनस्या
शक्यत्वान्न दंशेनेषां निवर्त्तकत्वं परिस्पन्दप्रायाश्चित्ते प्रवर्त्तकत्वमात्रमाश्रीयते बुद्धिपूर्वकं तु तत्स्मिन्नि
वर्त्तकत्वमभ्युपेयं अत एवर्त्वन्यादिषु च स्त्रुवापाताविधप्रसक्तिदर्शने पंचमहायज्ञानुष्ठानावर्त्तक
त्वमपि निर्बंधं स्यभावनिष्पिपेपि बुद्धिपूर्वकतद्वधान्निहत्तिः अतः क्रतुसंस्पर्शनस्य बुद्धिपूर्वकप्राणि
वधत्वान्नतो निवर्त्तकत्वमपि निषेधशास्त्रस्यावश्यमाश्रयणीयं तदा प्राग्युक्तदोषत्रयमापद्यते इति त्य
दिहारार्थं तस्य हिंसात्वेपि न निषेधशास्त्रस्पर्शतेति युक्तं न च दोषत्रयपरिहारार्थमिहापि निवर्त्तकत्वो
त्सर्ग एव स्वस्थानन्तइति वाच्यं निषेधास्पर्शेन तस्य परिहारे संभवति कृतोत्सर्गस्यागोप्योगादिति। अथ षोड
शी। बुद्धिपूर्वकेनिर्बंधानुष्ठाने पि विधिस्य विधिसंस्पर्शे निषेधशास्त्रस्य न निवर्त्तकत्वं किंतु प्रायश्चित्ते प्र
वर्त्तकत्वमात्रमिति त्वत्पक्षे विधिपरिहारार्थस्यात्र्यमत्र वदत्वमपि विषयीकृतस्य प्रवृत्ते प्रतूषापार्थानून्नवदन

निषेधशास्त्रेण तद्विश्वासं ततो न निवर्त्तकं किंतु केवलं वर्णितो नाहिंसाधोयकृतत्रसास्य न त्वं वदेन। तस्याव
नाय निर्वीर्यश्च ह्रःसारस्य तो द्विजैरिति स्मृत्युक्तप्रायश्चित्ते प्रवर्त्तकं न च तदननवदनं। विहितत्वात्तन्निषि
द्धं सारस्वतचार॥ विनैमित्तिको न तत्प्रायश्चित्तरूप इति शंकनीयं तस्यान्तर्यदनस्य पुरुषार्थत्वेन मानं तं वदे
दिति पुरुषार्थनिषेधगोचरत्वाव्ययंमावात् त्वयापि हिंसैव हिंसायान विहितत्वान् निषेधागोचरत्वमुच्य
ते किंतु वाक्यवैरूप्यकृत्वनिर्दृष्टित्रिप्रसंगभयात्वेह तदुभयप्रसंगो त्तिसारस्वतचार॥ विनैतत्प्रायश्चित्तरूप एव
तस्यावनायेति पापनिवृत्तिफलसंकीर्त्तनात्। तथा च क्रतुसंगपनस्य हिंसात्वे हिंसानिषेधशास्त्रस्य तं दशैव
न तं वदन् निषेधशास्त्रस्य वर्णितो वधपरिहारार्थान्नवदनो शास्त्रस्य निवर्त्तकत्वाभावेपि तद्रूपमो दक्रप्रायश्चित्ते
प्रवर्त्तकत्वमात्रेण शास्त्रं तु चरितार्थं भवेत् स्वमतकृतदृष्टाने प्रायश्चित्ताभावमिच्छद्भिरत्यन्तमेव हिंसि
धातुप्रवृत्तिनिमित्तं वाच्यं एतेन क्रमस्य निवर्त्तकत्वोत्सर्गस्य सा गोनयुक्त इति शंकापि निरस्ता बुद्धिपूर्वकान्

न॰वा॰ २२ 33

नवदननिषेधानि क्रयेण त्वागस्य विकृतत्वान्निषेधशास्त्रान्तं निषेध्यसमर्पकशाब्दसमर्पितं यावदर्थं निषे
धबोधकत्वमप्यौत्सर्गिकमिति क्रतुसंबन्धनस्य हिंसात्वमेवमुपगम्य निषेधसंस्पर्शानुपगमेन स्यौत्सर्गस्य
स्य तत्र क्रत्वनपाकृतत्वोत्सर्गत्यागस्यत्वन्यत्रापि समत्वात् न च निवर्त्तनस्य निषेधबोधनफलतया शेषित्वेन शेष
शेष्यन्यतरोत्सर्गत्यागप्रसक्तौ शेषोत्सर्गस्यागो पुक्त इति वाच्यं निवर्त्तनस्य निषेधबोधाधीनतया प्राथमिकनि
षेधबोधेन सर्वहिंसाक्रमणोत्पत्तितः तत्समारोपणा निवर्त्तनोत्सर्गत्यागस्यैव युक्ततरत्वात् प्राथाधावबलात्प्राथम्य
बलाधिकस्य सत्त्वं जातु विरोधित्वादर्थवादोऽयथार्थ्यतः व्याख्यातं दिङ्मूढस्य विष्णुद्देशस्य लक्षणोऽनुपक्रमाधि
करणन्यायसिद्धत्वेन प्रधानाश्रयणाबलात्प्राथम्यबलाधिकस्यैकेप्सितकन्यायपाशत्वादिति अथ समदर्शी
। निषेधशास्त्राणां स्मृतनिषेध्यपदशाब्दप्रतिपाद्यथावदर्थनिषेधबोधकत्वरूपस्यौत्सर्गस्य हिंसानिषेधशास्त्रेण
वत्स्यागम्यावद्धः । अन्यथा सर्वत्रान्वं गात्म्यापादनेन मरणान्तप्रायश्चित्ते च पुरस्त्वाभावप्रसंगात् । न त्वात्म

राम॰ २२

व्यापादनप्रयुक्तनरकदुःखंस्तुरायसब्राह्मणस्यो ह्यांसुरामाप्तिचेष्टः सुरामास्येमद्यः प्रुश्चे दितिशास्त्रविहित
कामकृतसुरापानप्रायश्चित्तसुरापानात्महननप्रपञ्चसहसोभयप्रयुक्तनरकदुःखंवाल्मीयःयेनतदुभयमभ्य
नुज्ञायैवज्योतिष्टोमरूपतुल्यसर्वस्वाराख्ये काहृत्तानुसाध्यस्वर्गार्थेनदीयाभवपवमानकालकर्तव्येस्वव्या
पादनेपूर्वकृतसुरापानप्रयुक्तनरकनिवृत्त्यर्थं उक्तमरणान्तप्रायश्चित्तेनवाकश्चित्सवनेनानचोक्तस्वव्यापाद
नादिजन्यंदुरितंलघुनोपायेननिवर्तयितुंशक्यंनवामृतेनपश्चात्तदुभयनिवर्तनोपायभूतंलघुगुरुवाकिं
चिदनुष्ठातुंशक्यंयेनकयाचित्प्रायश्चित्तेन, यथास्वव्यापादनादिजन्यंदुरितमपनेष्यामीतितदलक्षीकृत्यतस्मि
न्नुभयस्मिन्पुरुषःप्रवर्ततेतदनुसारेणहिंसासुरापाननिषेधशास्त्रयोस्तदंशेनिवर्तकत्वेत्सर्गपरिसमाप्तत्वाय
श्चित्तेप्रवर्तकत्वमात्रंपरिगत्यप्रमत्तनिषेधपरत्वादप्रवृत्तियावथपावदर्थनिषेधकत्वोत्सर्गःप्रदिपास्येतानस्मा
त्तदंशेहिंसानिषेधशास्त्रस्यप्रवर्तितोत्सर्गस्यागश्चावश्यकः एवमात्मवधाभिमुखस्यानुवधादिप्रवृत्तस्यापर्यमपितस्या

न॰वा॰
३४
34

गम्यावच्छेदकः न दोषो हिंसायामाहवनीयादिशास्त्रे यागाहत्वसंदेहाभावस्मरणात् तस्माद्धिंसानिषेधशास्त्र एव के
षुचित् अंशेषु प्रथमोत्सर्गस्यागत्या बलात् क्रत्वर्थसंकल्पनरूपांशं मरोपितस्यैव संकोच इति तत्। न तु तमप्रतिसंप्र
निवर्त्तकत्वोत्सर्गस्यागः एवं मरणान्तप्रायश्चित्तवत्पुरुषार्थनिषेधकोऽपि चेद्धि भूतानामपि क्रत्वर्थहिंसां प्रत्युत्क्रत्व
र्थनिषेधप्रतियोगित्वेन गृहीतात्प्रापकत्रिकोत्सर्गस्य तन्मात्रस्य संकोचो न भवतीति लोभात् क्रत्वर्थहिंसानिषेधस्या
प्यहिंसावाक्यार्थस्वीकारे प्रागुक्तदोषरूपापत्तिः। तस्मात् क्रत्वर्थसंकल्पनस्य हिंसात्वं किंत्वापत्तेः हिंसानिषेधशास्त्र
स्य तत्त्वो व्याचक्षते न तस्माद्धन्तव्यं हिंसाग्रहादिति निमित्तवाक्यमपि॥ अथ यादृशी नहिंस्यादिति पुरुषार्थहिंसानिषे
धे हिंसामात्रस्य प्रथमं निषेध्यत्वप्रतीतेः पश्चान्मरणान्तप्रायश्चित्तादेर्निषेधशास्त्रस्य निवर्तकत्वेन प्रायश्चित्तप्र एम॰
वर्तकत्वेन वा चारितार्थ्यं नास्तीति तन्मात्रस्य बाधकवशान्निषेध्यतायोगेऽपि दृष्टान्तसत्त्वमात्रेण क्रत्वर्थहिंसायामप्य ३४
पित्यागो न युक्तः तत्र प्रायश्चित्तप्रवर्तकत्वेनापि निषेधचारितार्थ्यात् न हि सामान्यतः प्राप्तानां मध्ये कस्यचिद्बा

षकवशात्स्वर्गे सति तद्दृष्टान्तेनान्यस्यापि स्वर्गोपयुक्तः। तथाश्वस्याग्रयणदक्षिणारूपे वत्से चोक्तदशा
सामान्यं स्नात्वाहार्यधर्मिणां मध्ये याकस्य दक्षिणारूपवत्सनाशस्य संगात्स्वर्गे सति तद्दृष्टान्तेन तथाभूत
वाधकवशाद्धिंसापि तद्धर्मस्य स्वर्गश्वसंगात् तत्स्मात्क्रत्वर्थहिंसाया अपि पुरुषार्थनिषेधः प्राप्नोतीति तन्म
निषिद्धत्वस्य हिंसायामपि तद्वृत्तेर्हिंसाविधायकस्य वृत्तिनिमित्तं वाच्यमिति। अत्रैके। न विशेषो। न दृष्टान्तसद्भाव
मात्रेणाक्रत्वर्थहिंसायाः पुरुषार्थनिषेधकोटौ हि भावः। उच्यते किं तु मरणान्तप्रायश्चित्ताद्याव‍र्तकविशेष
णां क्रोडीकृतत्वेन। तथा हि मरणान्तप्रायश्चित्तं सर्वे लोकैकलिंगस्य आपादनं ब्राह्मणाभिमुखब्रह्मघ्नहननं
उचितं दण्डरूपं चोरहननं स्तेनहननं इति वद्धनि हननानि पुरुषार्थहिंसानिषेधे निषेध्यकोटिप्रवर्तनीयानि ता
वेवद्यावत्तन्नार्थं तत्तदतिरिक्तत्वरूपवत्त्वविशेषणोपादानेनोपवारणं एकेनरूपेणास्वर्गव्यावर्तनीयहिंसाजातं क्रो
डीकृत्य तदतिरिक्तत्वरूपैकविशेषणोपादानेनैव लाघवमिति तन्न प्राचीनवत्क्रोडीकारकरूपसंभवात्क्रोडीकृ

तद्व्यतिरिक्तत्वमेव पुरुषार्थहिंसानिषेधप्रतियोगिकोद्देशेनिवेशायितुमुचितं संभवति च॥ तथाभूतदु
पं वध्यानुग्रहपर्यवसायित्वं अनुगतं हि तत्सर्वं न मारणं तथा यश्चित्तस्य महापापनिवर्तकत्वात्सर्वस्याद्
स्वात्मस्वापादनस्य न तत्साध्यस्वर्गार्थत्वात्॥ आह वा॥ अभिमुखे चोरैः क्षेत्रे न हननानामपि हा विमो पुरुषो लोके
सूर्यमंडलभेदिनो॥ परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः॥ राजमिर्धृतदंडाश्च कृत्वा पापानि मानवाः
निर्मलाः स्वर्गमायांति संतः॥ सुकृतिनो यथा॥ स्तेनः प्रकीर्णकेशो मुसली राजानमियात् कर्म वा च क्षाणः
पूतो वध मोक्षाभ्यामग्रत एनस्वी राजेत्यादिस्मृत्यनुसारेण वधेष्टसाधनत्वाज्ञेन चेद्रूपेण क्रत्वर्थहिंसापि क्रो
डीक्रियत एव यथा ततायिनमायान्तमपि वेदान्तपारगं निहत्य ब्रह्महा न स्यान्न ब्रह्म हन्तात्मकर्णाहा भवेत् इति
स्मृतिविहितमाततायिब्राह्मणहननं आलिंसां म… गर्भिणीमालभेत इति श्रुतिविहितगर्भिणीहननेनांत
रायकं गर्भहननं च न तेन क्रोडीक्रियत इति अपरितोषः न तावत्तेषामनुपदिष्टे वेशो ऋषिकप्रायश्चित्तत्वे सति वि

ध्यनुज्ञानत्वं कोडीकारकमस्तु न च यथा चोक्तधर्मकोडीकृतत्वमतिरिक्तत्वरूपपुरुषार्थनिषेधप्रतियोगिहिं
साविशेषणताविवक्षावश्यामरणानतशायश्विन्नादिवत्क्रत्वर्थ [redacted] हिंसाविपरत्पुषार्थनिषेधप्रतियोगि
कोटेर्व्यावर्त्तिता भवति पुनः क्रत्वर्थहिंसाया निषेधाविषयत्वसमर्थनं सम्भवात् न तथाहृतं हिंसिधातुप्र
वृत्तिनिमित्तं वाच्यमिति॥ इति विंशतितमी। मरणानतशायश्विन्नादिकं हिंसानिषेधाद्याववर्त्तनीयमिति नावद
विवादं तस्य यममेव हिंसिधातुप्रवृत्तिनिमित्तसंकोचनेन वा पश्चाद्बाधकोपनिपातेन वेति विचारणायामा
द्यपक्षे हिंसानिषेधवाक्यार्थप्रथमप्रतीतावेव तदावर्त्तनं लभ्यत इति लाघवं भवति द्वितीयपक्षे तु प्रथमं मार
णमात्रनिषेधप्रतीतो मरणानतशायश्विन्नादिवत्रुविधहिंसाविधिवाक्यविरोधस्फूर्त्यनंतरं तन्निरासाय क्रतुसमुत्थ
गपि रिस्कमरणानतशायश्विन्नादिव्यावर्त्तकविशेषणांनिषेधकोटौ निवेश्य पूर्वप्रतीतिमुपमर्द्य हिंसावाक्यार्थप्र
तीत्यन्तरं संपादनीयमिति गौरवं स्यात्। अतो लाघवानुसारेण वाउवेतक्रियपक्षे नरिष्यसोति एतत्पनीयस्य पक्षोऽर

न॰वा॰ हिंसात्वप्रतिपादकमंत्रस्वारस्यानुसाराच्च प्रवृत्तिनिमित्तसंकोचपक्ष एव न्याय्य इति ॥ अथैकविंशी ॥ अहिंसा
३६ वाक्यार्थप्रतीतिलाघवात्प्रमाणांतरावरुद्धं तदुपजीव्यहिंसाविधानसूत्राणि ग्रहकाले लाघवेन मरणांतशायस्थि
त्यादिन्यायवर्त्तकविशेषणरहितस्य तत्स्य प्रवृत्तिनिमित्तत्वावधारणे सति तदनुसारेण हिंसावाक्यार्थनिर्णयविलंब
J6 रूपस्य गौरवस्य फलमुखत्वेनादोषत्वात् । अन्यथा वाक्यार्थनिर्णयविलंबरूपगौरवपरिहारार्थमिह प्रवृत्तिनि
मित्तसंकोचकल्पनेन क्रत्वर्थसंतापनेन हिंसेत्यभ्युपगमे सौत्रामणीण वणीत्रये पिष्टिपिष्टस्पर्शमार्जनादिकायाः पेक्षाः
सुराया ग्रहणेन ग्रहणोपानेन पानं अश्वमेधे राजानुज्ञया अश्वसंरक्षकैः क्रियमाणमश्वमेधं विषयमंत्र ग्रासलाक
त्याधेदिनां ग्रासस्य णानाम ग्रासग्रणानां चाभ्यवहार्यत्वाविघहरणेन प्रस्रहणां नामदेवोपासकस्पर्शार्थपमानस
र्वयोविदपरिहरणेन तत्संगतिरिस्याविनत्वविशेषवाक्यार्थप्रतीतिलाघवार्थमभ्युपगमप्रसंगात्तस्माद्यथाहव ए॰म॰
नीये जुहोतीत्याहवनीयरूपहोमाधिकरणविधिवाक्ये जुहोतिधातोरन्यपदे जुहोति समसमेपदे जुहोति । अथाभ्य ३६

नेजुहोतीत्यादिवाक्यनिर्णीताधिकरणांतरविशिष्टहोमातिरिक्तहोमविषयत्वं कल्प्यते न तु तत्सत इति
रिक्तहोमे शास्त्रसंकोचः क्रियते एवं हि महाविषयस्यैव न्याय्यो नुसरणीयः तथा न वा उ एतन्म्रियसे न रिष्यसीत्या
दिमंत्रस्यारस्यानुसरणमप्ययुक्तं। श्रुतप्रवृत्तिनिमित्तानुसारेणाहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः इत्यारभ्यानु
त्तरजन्यहिंसायै न दोषो हिंसायामाहवनीयादिम्रोतस्मान्नैव वहाणानुसारेणैव क्रत्वर्थसंज्ञपनादीनामपि हिं
सिधात्वर्थत्वस्थितौ तत्तदनुसारेण न म्रियसे इत्यौपचारिकशब्दपाठानुसारेण च न रिष्यसीत्यस्याप्यौपचारिकत्वौ
चित्यात्। तस्मादवश्यमावर्जनीयहिंसांतरव्यावृत्त्यर्थं पुरुषार्थनिषेधप्रतियोगिहिंसाविशेषणावशादेव क्रत्वर्थ
हिंसायाः पुरुषार्थनिषेधाविषयत्वलाभमात्रस्य क्रत्वर्थनिषेधस्याप्यहिंसावाक्यार्थत्वस्वीकारे वैरूप्यदोषापत्तेः त
स्यैव तद्वाक्यार्थत्वाभ्युपगमशंकापास्तशीघ्रप्रतीतपुरुषार्थहिंसानिषेधविषयत्वौचित्येनानवकाशीकरणात् क्र
त्वर्थसंज्ञपनस्य हिंसात्वेपि न निषेध्यत्वप्रसक्तिरिति नियमाविधिकहिंसिधात्तु प्रवृत्तिनिमित्तकल्पनागौरवमुरीकरणी

ने. वा. ३८ यमिति सिद्धं मदीयमनुमानं नाप्रयोजकं त्वदीयमेवानुमानमप्रयोजकमिति प्रभुः हिंसाया अहिंसाया अहिं
सात्वमिति माध्यस्थ्योपचारिका हिंसात्वपरिहिंसायास्तस्या मुख्यो हिंसात्वानुपपत्तेः हिंसायाश्च तदनुवादेन हि वस्तु
तो हिंसात्वाभ्युपगमः स्पष्टीकृतः तस्माद्यथा वो वा अस्येगो अस्य भः पः यथा वो गो अश्वाः इति प्रभुत्वेनानूदिता
नां गवाश्वव्यतिरिक्तानां अप्रभुत्वोक्तिवदियमहिंसात्वोक्तिरोपचारिकी सेव युक्ता। अत एवात्राधिकरणभा
ष्ये हिंसारूपे हिं परप्राणवियोचनमिति जगदनुग्रहार्थस्यापि प्रलये सर्वसंहारस्य हिंसात्वं व्यवहृतं तस्मात्क्र
त्वर्थसंगतपवनस्य हिंसारूपत्वे विधिविरोधात्तद्विधाविषयते सेव भाष्यकाराणामभिप्रायः। इति हिंसाधात्व
र्थवादः। क्रत्वर्थसंगतपवनस्य हिंसिधात्वर्थाच्यत्वनिरूपणप्रसंगात् नीलादिद्रव्याणां नीलादिशब्दवाच्यत्वं सव रा.म. ३८
र्वशास्त्रोपदेशादिसकरणभाष्ये व्युत्पन्नः सर्वशब्दवाच्यत्वोपपादनार्थं दृष्टान्ततयोपात्तं व्यवस्थापयितुं नी
लादिशब्दानां गुणमात्रवाचकाः गुणनिमित्तकोपनामभेदोपचारेण लक्षणया शक्तिभ्रमेण वा प्रयुज्यन्त इति वे

पायकादिमत्त्वं पूर्वपक्षस्तथापि परिगृह्य वादकथायां प्रत्ययतो तत्र नीलपदे नीलत्वजातिप्रवृत्तिनिमित्तकतया
नीलशब्दवाच्यं यथा नीलरूपमिति प्रथमा कक्ष्या। अप्रयोजकमिदमनुमानमप्रयुक्तं तर्काभावात्। नी
लपदे न नीलत्वजातिप्रवृत्तिनिमित्तकतया नीलशब्दवाच्यः नीलरूपान्यत्वात्। यन्नीलरूपान्यत् न तन्नील
त्वजातिप्रवृत्तिनिमित्तकतया नीलशब्दवाच्यं यथाम्बुजरूपं नीलशब्दवाच्यत्वाभावव्याप्यत्वाभावव्याप्यनी
लरूपान्यत्ववाच्यत्वायत्तस्मान्नीनीलशब्दवाच्य इति द्वितीया। शब्दप्रवृत्तिनिमित्ताश्रयस्य तद्वाच्यत्वाभावानुपपत्तेः
वा पूर्वानुमानेनाप्रयोजकं पूर्वानुमानमेवाप्रयोजकमिति तृतीया। गुणगतजातीनां परंपरया द्रव्याश्रय
त्वात् गुणगमेव प्रवृत्तिनिमित्ताश्रयत्वमात्रं न शब्दवाच्यत्वप्रयोजकं किंतु साक्षात् तदाश्रयत्वं अन्यथा परंपर
या गुणशब्दप्रवृत्तिनिमित्ताश्रयस्य द्रव्यस्यापि गुणशब्दवाच्यत्वे गुणवचनेभ्यो मतुपो लगनुशासनं वि
रोधमापन्नं तेन मत्वर्थस्य एवानियमार्थमविष्यति अतो वा पूर्वानुमानमप्रयोजकं पूर्वानुमानं चनाप्रयोजकमिति चतुर्थी

न॰वा॰ ३८ अथपंचमीशब्दवाच्यताप्रयोजककेतत्स्वरत्तिनिमित्तान्यत्वेसाक्षात्तद्विशेषणाभावेमतुब्लोपानुशा
सनविरोधोनप्रसज्यतेद्विविधाहिगुणशब्दाःद्रव्यपर्यंतागुणमात्रेविश्रांताश्चनीलमुत्पलमुत्पलस्यनी
लइतिद्विविधव्यवहारदर्शनात्तथाचयथाद्रव्यवाचिनीलादिशब्दानांगुणपरत्वविवक्षायांनैल्यंनील
त्वंनीलिमेतिभावप्रत्ययप्रसक्त्यातेषांगुणवाचिनांद्रव्यपरत्वविवक्षायांमतुप्प्रत्ययोपिभवेत्दृश्यतेहिपुण्य
पापशब्दानांअयंपुरुषःपुण्यःअयंपापःअस्यपुण्यमस्यपापंपुण्यःपुण्येनकर्मणाभवतिपापःपापे
नेतिद्विविधव्यवहारदर्शनात्तथैवधर्मीधर्ममात्रवाचकत्वेनतद्धर्मिपर्यंतत्वेनचद्विविधानांमध्येधर्मीध
र्ममात्रवाचिनांधर्मिपर्यंतत्वविवक्षायांपुण्यवान्पापवान्इत्यादिमतुबंतस्यव्यवहारस्तथात्रापितत्सा राम॰
सेनतल्लोपानुशासनेनेनगुणविश्रांताःनीलादिशब्दाःमतुल्लोपेनद्रव्यपर्यंततेनसमर्थाःनतुमतुबंततयेतिस्थि ३८
तिअतःसाक्षात्विशेषणांमोरवान्ननिवेशनीयमितिनाप्रयोजकमिति।अथषष्ठी।गुणवाचिनामेवनीलादि

38

शब्दानां तद्वत्सु लक्षणया प्रयोगसंभवात् तन्नैव विशक्तिः कल्पनीया गोत्वादेर्नतो मनुज्ञोपानुशासने लक्ष
णानियमार्थमित्येवोपपादनीयं गुणपरनीलिमादिशब्दनिष्पत्तिर्विलक्षणमाणद्रव्यपरनीलादिशब्दानां भावप्र
त्ययेनोपपादनीया जातो मनुज्ञोपानुशासनानुरोधेन लक्षणीयेद्रव्यातिरिक्तगवारणाय साक्षात्त्वविशेषणा
पेक्षणाद्वाघनुमानमप्रयोजकं प्रत्युतमानं च नाप्रयोजकं। अथ सप्तमी। गुणशब्दानां गुणिषु शक्तौ तरक
ल्पने हि गोत्वं भवेत्वसाक्षात्संप्रसाधारणेन तेषां स्वप्रवृत्तिनिमित्ताश्रयमात्रे शक्तिरिति लाघवोपनी
तेकधर्मावच्छेदेन गुणेगुणिषु एकशक्तिग्रहणपक्षे न गौरवप्रसक्तिः यद्यप्यस्मिन्पक्षे शक्यव्यक्तिगौर
स्य लक्षणागौरवमस्ति तथापि प्रथमप्रवृत्तावच्छेदकलाघवानुसारेणायश्चाशायत्तत्फलमुखव्यक्तिगौरवं न
दोषः तस्मान्नीलादिशब्दप्रवृत्तिनिमित्तसाक्षात्त्वेन निवेशनीयं नापि मनुज्ञोपानुशासने लक्षणानियमार्थमि
त्येवोपपादनीयं तस्माद्वाघनुमानं नाप्रयोजकं प्रत्युतमानमेवाप्रयोजकमिति। अथाष्टमी। गुणानुशासने लक्षणा

न॰ वा॰ नियमार्थमित्थं वोपपादनीयं साक्षात्संबन्धावच्छिन्ननिवेशनीयं। अन्यथा त्वद्दीत्याघटवति भूतले स्वप्रयोघटत्वा
३९ श्रयत्वेन तत्साधितघटत्वस्य वाच्यत्वापत्तेः न च प्रवृत्तिनिमित्तं तत्त्वस्य पृथक्सिद्धा। अथ तत्र विवक्षितनिमित्तिनाति पूर्वं
गइति वाच्यं। अपृथक्सिद्धिर्हि तावत्तद्रूपोरेकस्य पराश्रितत्वनियतिः तत घटत्वस्य समयानन्तरमप्यनुवर्तमा
नायां नीलघटत्वजाते तत्तदाश्रितत्वनियमाभावात् नापि तत्तद्धर्मित्वं तदाश्रितत्वनियतिः। घटे पृथक्सत्त्वाव
39 च्छिन्नेनीलरूपानुसृत्यात्र तस्मिन्नायाक विहितेनीलरूपनाशेन च तस्याः सत्त्वविघटेन तदाश्रितत्वनियमासिद्धेः
नापि धर्मित्वापरं पराघटके च सति धर्म्याश्रितत्वनियतिः पृथक्सिद्धिः साक्षान्नीलत्वजात्याश्रये नीलरूपे परं
पराघटकाभावेन तदसंग्रहापत्तेः अतः संबंधातत्वे हि तिष्ठत्प्रयोजकयावत्सत्त्वे तदाश्रितत्वनियतिस्तत्पृथक्सि
द्धिरिवाच्यं तथा च तियघटत्वस्य परं परस्यात्र भूतलसंबंधं घटभूतलसंयोगोऽविप्रयोजकः इति तत्त्वेऽपि घटत्वस्य भूत ए म॰
लाश्रितत्वनियतिसंभवात् तथा च पृथक्सिद्धिविशेषणेन तद्व्यावृत्तिः कथं च घटस्य रूपादिशब्दवाच्यत्वप्रस ३९

केर्व्यावृत्तिः॥ न हि नीलत्वादीनां रूपत्वादीनां च द्रव्यापृथक्त्वसिद्धिस्वरूपत्वेन केन चिद्विशेषणेनोपपादयितुं शक्ये
अतः साक्षात्त्वविशेषणमेव निवेशनीयं लुगनुशासनं च लक्षणानियमार्थमित्येवोपपादनीयं तस्मात् प्रयो
जकं वा यदनुमानं प्रत्यनुमानं च नाम प्रयोजकं। अथ पंचमी॥ घटत्वस्य भूतले रूपत्वस्य रूपाचाश्रयत्वेन भव
ति घटो भूतले रूपे घट इति एवमादिव्यवहारस्य पक्षाश्रयताग्राहकप्रमाणस्याभावात् न तस्याश्रयमात्रमाश्रयद्वा
रा भवत्याश्रयः किंतु यस्य तत्राथाश्रयताग्राहकं प्रमाणमस्ति स एव तदाश्रयो भवंति यथा कारणकारणमात्रं न का
रणं कुलालपित्रादेस्तथात्वेप्यकारणत्वात् किंतु तस्यापि यत्र कारणताग्राहकं प्रमाणमस्ति तदेव यागादिस्वर्गा
दिकारणं भवतीति तथा हा विशेषोजनीयं तस्मात्र साक्षात्वं निवेशनीयं नो किंतु गनुशासनं लक्षणानियमार्थमुप
पादनीयमतो नाप्रयोजकं वा यदनुमानं प्रत्यनुमानमेवाप्रयोजकमिति। अतः यदि घट भूतलादिकं रूप
त्वघटत्वाद्याश्रयो न भवति तथात्वग्राहकप्रमाणाभावात् न हि घटादिकं नीलत्वाद्याश्रयोपि न भवेत्

न॰वा॰
४०

40

वाधमिमतनजथात्वग्राहकप्रमाणमावादेवानीलोघटइतिव्यवहारोऽस्तीतिचेवसहिमतुब्लोपानुमान
नानुसारेणमतुपःप्रयोगेणावानर्थस्तावंतमर्थद्रव्यपरस्यनीलादिशब्दस्यगमयतिमतुप्प्रयोगेचद्रव्य
स्यनीलत्वाश्रयगुणाश्रयत्वेवतदर्थोभवेत्तन्नतुनीलत्वाश्रयतीतोमध्यादेडीप्रत्ययइतिव्यवहारःप्रत्ययस्यदं
डुतात्राश्रयत्वेनप्रमाणंजथानीलोघटइत्यादिव्यवहारोपिघटस्यनीलत्वाघाश्रयत्वेनप्रमाणेनकारण
ईतिंपरिलअस्थयापश्रयद्वारेणाश्रयोभवतीतिवादिनोरीतिणाश्रयणीयानामेववरीतिमतुब्ध्वयादिनाति
प्रसंगवारणायलक्षणानियमार्थंलुगनुशासनानुरोधायचसाक्षात्तंनिवेशनीयमित्यापानमोवापत्तुमा
नमप्रयोजकमप्यनुमानंचनापयोजकमिति॥ अथैकाघटादीनांनीलत्वाश्रयत्वेप्रमाणमावोस्तिकुःनी
लोघटइत्यादिप्रतीतिव्यवहारस्तद्धावात्नहिनीलोगुणइतिप्रतीतिव्यवहारयोनीलोघटइत्यादिप्रतीति रा॰म॰
व्यवहारयोश्चमात्रयापिविशेषमीक्षामहेपिनगुणविषयोनीलताघाश्रयगोचरोगुणविषयेनदाश्रया ४०

श्रायिणोश्चराविति तिथ्ये ब्रम्यं कल्पे तत्उभयविषययोर्गृहीतयोर्विशेषाभावादेव हि तैऽप्रमाणीकृत्य गुणगु
णिनोः केचित् संज्ञाभेदमभ्युपगम्य नीलो गुण इत्यादिप्रतीतिव्यवहारावप्युपपाद्य तयोर्भेदाभेदं च
समर्थयन्ते। तयोः संज्ञाभेदवादिनश्च कथं तर्हि नीलो घट इत्यादिप्रतीतिव्यवहारावित्याशंकामनुह्नो
यादभेदोपचारादिति मनुह्लोपनुल्लस्तेनाभेदोपचारमपि नद्गुणपादकमुपाददते नयोर्हस्तु भवसाक्षिक
विशेषसद्भावे तु नीलो घट इत्यादिप्रतीतिव्यवहारालंबनमभेदसमर्थनं भेदाभेदसमर्थनं चास्पेतनि
रालंब[illegible]लंबनं स्यात्। अभेदोपचारवर्णनमपि विरुध्येत तस्मान्मनुह्लोपानुशासनं प्रमाणवानित्यादिदृशीसाम
नुबंनप्रयोगेन कार्यइत्येतदर्थमित्येव प्रक्रांने वं घटो भूतलं रूपं घट इत्यादिप्रतीतिव्यवहारोक्तः
[illegible] सोऽपि घटभूतलादीनां रूपत्वघटत्वाद्याश्रयत्वेन मानीभवेत्।। न च त
तोऽन्यत्र उभमात्रमस्ति न च बहिर्विद्यते प्यासोदयतीतिवचनानुसारेणास्माभिर्बहिराश्रितानां हि विज्ञानं बहिराश्रयपभू

न॰ वा॰ तावेदिताश्रयत्वस्य च यथा वेधांहवींष्यासादयतीति वचनं केवलबर्हिषां कूपाच्छादनत्वान्न्यायेन हविराधारत्वान
४१ संभवतीति लौकिकदृष्टिस्थप्रमाणान्तर्थे ह किंचित्प्रमाणं दृश्यते अतो वा यत्नु मानं नाप्रयोजकं प्रसज्जमानं चाप्रयो
जकमिति। अथवा। रूपत्वस्य घटाश्रयत्वं इव घटत्वस्य सम्भूतत्वाश्रयत्वं इव नीलत्वस्य घटाश्रयत्वेपि प्रमाणाभावो ना
स्ति॥ उभयविषययोर्द्रव्यविषययोश्च नीलप्रतीतिव्यवहारयोर्लौकिकः स्पष्टं विशेषानवगमे च्चाद्यौ नीलत्वजात्याश्रय
41 विषयेहि तीयो तहि शिष्टवैशिष्ट्यविषयाविति विशेषस्यावश्यमभ्युपगन्तव्यत्वात्। अन्यथा नीलः स्फटिकः पीतं सुवर्णं
उष्णं सलिलं इत्यादिप्रतीतिव्यवहारैः स्फटिकसुवर्णसलिलादीनामपि नीलत्वपीतत्वोष्णत्वादिजात्याश्रयतापत्त्या
नीलपीतोष्णादिशब्दवाच्यत्वप्रसंगात्। एवं द्रव्यविषययोर्नीलादिप्रतीतिव्यवहारयोर्विशिष्टवैशिष्ट्यविषयत्वमालोच्यैव
भगवता कात्यायनेनमनुज्ञोपानुशासनं हृतं। अथ प्रमाणाभावेप्याश्रयाश्रयमात्रमाश्रयद्वाराश्रयो भवतीति परि राम॰
भाषामात्रं क्रियते तदा घटभूतलादीनां रूपघटादिशब्दवाच्यत्वप्रसंगवारणाय साक्षात्त्वविशेषणं निवेशनीयं सन्तु ह्लो ४१

मानुशासनं च लक्षणादिनियमार्थमित्युपपादनीयं तस्मादेवमोजकं वा अनुमानं प्रत्यक्षानुमानमेव प्रयोजकमिति । अ
थ च । गुणविषययोरिव द्रव्यविषययोरविनाभावादिप्रतीतिव्यवहारयोर्नीलताया अयथार्थतायां प्रामाण्यमुपपद्यत ए
व । नीलः स्फटिक इति प्रतीतिव्यवहारयोर्भ्रान्तितन्मूलव्यवहारत्वेन तत्रांशे प्रामाण्यं प्रसज्येत तत्र हि स्फटिकः सं
न्निहितेन्दीवरादिनीलिमगुणं नीलत्वसमासादात्मयनाविपर्ययपरयानीलिमगुणस्य दाश्रयस्येन्दीवरस्य च स्फटिकाश्र
यत्वाभावात्परंपरया परकस्य सद्भावस्याश्रितात्वे हितद्वारा तदाश्रितत्वमप्याश्रितं भवेत् यथा द्वारस्य कारणत्वेऽपि तद्
द्वारान्तराकारणमपि द्वारान्तरमाविनिष्कारणं भवति अन्यथापागस्य स्वर्गकारणतानिर्वाहार्थमपूर्वमात्रं कल्पे
त न तत्स्वर्गकारणत्वमपि । एवं च सर्वत्र नीलत्वानाश्रये स्फटिके भवन्ती नीलप्रतीतिर्भ्रान्तिरूपेति तस्मात्तन्मूलव्य
वहारस्य च नीलताश्रयतायां प्रामाण्याभावमात्रेण कथं नीलो घट इत्यादिप्रतीतिव्यवहारयोः स्वतः प्रामाण्यस्या
प्रामाण्यमपेति । पीतं सुवर्णमिति प्रतीतिव्यवहारो न यथा नीमाश्रयतायां च मात्रमेवापीति मगृहत्वाधिकरणपा

न०वा०
४२
42

र्थिवावयविव्यतिरेकेणातदंर्गतस्य सुवर्णांशस्य वाच्यसौ सौ तं शास्त्रानंगीकारात् नैमित्तिकद्रवत्वसज
त्यादिवत्पार्थिवत्व एवोपपत्तेः नहि सुतसुवर्णमध्ये पार्थिवभागः तन्मध्यनिक्षिप्तपाषाणखण्डवत् अनुगत ए
वावतिष्ठते येन द्रवत्वाश्रयभूतमन्यत्तत्र स्यात् तत्र सतपीतं द्रुतमपि सैवानुभूयते। फाण्यमानजलरूपापरावृ
त्तेरिव सुवर्णरूपापरावृत्ते। पितद्रीवद्रवत्वेनासंमतानलसंयुक्तवज्ररूपापरावृत्तेरिव वस्तुस्वभावेनैवोपपत्तेः सु
वर्णस्य पार्थिवत्वेप्यसंतानानलसंयोगेन तदीयद्रवत्वस्य वज्ररूपस्येवानुच्छित्तेः पि वस्तुस्वभावादेवोपप
त्तेः। अथवा सुवर्णं तैजसमेवास्तु। द्रुतसुवर्णे दृश्यमानस्य स्वतन्त्रया निमित्तोपष्टम्भेऽपि हि तत्र रूपं तैजसत्वरूप
मितिश्चेत्तो तेजोरूपत्वेन उत्पत्ते लोहितस्यैव वाचां नरविरोधोपपत्तेः स्फटिकेषु तेजोवत्तद्रूपत्वेन वर्णानि पीतलो
हितश्वेतकृष्णवर्णोऽन्योन्यातिरिक्तस्य रूपस्याप्रामाणिकत्वात् गुरुत्वमपि करकावयवेषु जलेऽपि काठिन्यमिव सुव
र्णावयवेषु तेजस्यपि अनुभवबलादुपपद्यते उद्भूतरूपस्य तेजसः प्रकाशकत्वदृष्टावप्यत्र तदभावस्तत्स्वभावानुभव एम.
४२

बलादुपपन्नः सुवर्णगततेजोंशस्य परप्रकाशत्वाभावोपि परपक्षे पार्थिवांशगतपीतिमाभिभवादिसम्भत्त्रादृष्टए
व स्वभावविशेषः कल्पनीयः न हि परपक्षेप्यस्मत्र तदीयादावुपष्टंभकपार्थिवभागस्य तेजोगतभास्वरत्वाभि
भावकत्वं दृष्टमेव मुख्ये जलमिति प्रतीतिव्यवहारावपि जलस्योष्णत्वाश्रयतायां प्रमाणमेव जलवत् स्वतो
द्रवत्वरहितस्यापि पार्थिवस्य घृतलाक्षादेर्द्रवत्ववत् स्वतः शीतस्यापि जलस्याग्निसंयोगान्नैमित्तिकस्योष्म
स्पर्शस्योपपत्तेः तत्र तेजोन्तरोपनिक्षेपनाया गौरवपराहतत्वात् तदन्यथयः पिंडीभूतवह्निवदेति तप्ते लोहे
त वह्निज्वालावच्छन्नतप्तजलसंश्लेषः किंचित्तेजोनुभूयते तस्मान्नीलो घट इति प्रतीतिव्यवहारयोर्नीलत्वाश्रयता
यां प्रमाणस्य दृष्टांतोपन्यासेन प्रतिक्षिप्तमशक्यत्वात् प्रागुक्तंरीत्या बाधानुमानं नाप्रयोजकं प्रत्यनुमानं चा
प्रयोजकमिति। अथ चतुर्दशी। नीलस्फटिकादिदृष्टांताः प्रतिवादिनो नैयायिकस्य मतमनुसृत्योक्ताः। त
न्मते हि नीलः स्फटिक इति प्रतीतिः परंपरासंबंधेन संनिहितोपाधिगतनीलगुणावैशिष्ट्यविषया प्रमैव तथा

न॰ वा॰
४३
43

पीतं सुवर्णमिति प्रतीतिस्तैजसे सुवर्णे न तदुपष्टम्भकपार्थिवभागगतपीतगुणवैशिष्ट्यविषया उष्णं जल
मिति प्रतीतिस्तदन्तःप्रविष्टानलभूतरूपतेजोगतोष्णगुणवैशिष्ट्यविषया। न च तत्तन्मतमपीदानीं दृष्टान्तो
यन्यासस्सततात्र सतावावाध्येपन्यस्तदूषणो न किंचिद्धीयतो संनिवाधमभिमतादृष्टान्तात्प्रागादिशाछेनगृ
हीताः नीलं वस्त्रं लोहितं काष्ठमित्यादिप्रतीतिव्यवहारा न हि वस्त्रं रंजकद्रव्यावयवानां काष्ठमात्रयांशस्य
वह्नेर्वानाश्रय इति वक्तुं शक्यं तस्माद्यादिनापि तन्यतदृष्टदृष्टान्तानुसारेणाद्रव्याविषयो नीलादिप्रतीतिव्यव
हारयोर्नीलत्वाद्याश्रयत्वविषयताभिमानस्यकल्प्य इति। अथ पंचदर्शी नीलं वस्त्रमित्यादिप्रतीतिव्यवहारा अ
पि नीलत्वाद्याश्रयताविषया एव किंतु ध्वान्तिरूपाश्च नीलमेव वस्त्रं रंजकद्रव्यसंपर्कान्नीलं भासते। अलोहितमे
व काष्ठं तदुपारूढवह्निसंपर्काल्लोहितं भासत इति विरुद्धप्रतीतिव्यवहारौ स्तः पटो नीलगुणो न भवतीति रा म॰ ४३
प्रतीतिव्यवहारौ तु न नीलत्वाश्रयताबाधकौ गुणत्वाभावेन चारितार्थ्यात् तस्माद्बाधितो प्रतीतिव्यवहा

रोघटस्यनीलत्वाश्रयतायांप्रमाणाभवेत्तामेवेति। अथषोडशी। नीलत्वजातेराश्रयत्वविषयतायामबाधि
तावेतौ प्रतीति व्यवहारविसेनदृष्टेऽइहापि बाधकसद्भावात् तथाहि लुल्लोपानुशासनेनावदेकंबा
धकं प्रत्ययश्रवणाप्रयुक्तयोगिकार्थप्रतीतिसद्भावे हि तल्लोपानुशासनं सार्थकं भवेत् अत एव पंचाला
नामकेचनक्षत्रियाः तेषां निवासोजनपद इति विवक्षायां तेषां निवास इत्यर्थे प्राक्रदीव्यतीयः प्रत्ययोभ
वतीति मत्वा तस्य जनपदे लुबिति प्रल्लोपानुशासनं जरद्वैयाकरणैः कृतं तन्न कर्त्तव्यं जनपदविशेषवर्त्तमा
नेन तत्संज्ञारूपेणापांचालशब्देन पंचालनामकक्षत्रियाणांनिवासोजनपद इति योगिकार्थप्रतीतिसद्भा
वे हि तल्लोपानुशासनं सार्थकं भवेत् अत एव पंचालानामकेचनक्षत्रियाः तेषां निवासोजनपद इति वि
वक्षायां तेषां निवास इत्यर्थे प्राक्रदीव्यतीयः प्रत्ययोभवतीति मत्वा तस्य जनपदे लुबिति प्रल्लोपानुशास
नं जरद्वैयाकरणैः कृतं तन्न कर्त्तव्यं जनपदविशेषवर्त्तमानेन नत्संज्ञारूपेणापांचालशब्देन पंचालनाम

न॰ वा॰
४५
44

कक्षत्रियाणां निवासो जनपद इति योगिकार्थप्रतीत्यनद्यानन्तरो रूढ्या जनपदविशेषस्यैव प्रतीत्युदयादि
ति दूषितं। पाणिनिना लुब्योगाप्रख्यानादिति सूत्रेण शिष्यमिति पूर्वसूत्रादनुवृत्तिमत्ता तथाह्णाधि
करणन्यायविरोधापत्तिरूपमन्यद्बाधकमरुणाधिकरणे हि अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाती
ति श्रुतिगतस्यारुणायदस्यारुणिमगुणपरत्वमङ्गीकृत्यारुणिमगुणैकहायनीद्रव्योभयसाधनकक्र
यभावनाविधिरङ्गीकृतः सत्तु गुणवचनानां गुणमात्रशक्तत्वाङ्गीकारं संगच्छते अरुणशब्दस्य पिङ्गाक्ष्यादि
शब्दसमानाधिकरण्यरूपेण वाक्यप्रमाणेन द्रव्यपरत्वप्रतीतावपि विनस्य गुणमात्रे शक्तिपक्षे द्रव्यपरत्वस्य ल
क्षणयोपपादनीयत्वेन श्रुतिविरुद्धवाक्यबाधनीयपत्तेः। तस्य गुणसाधारणशक्तिपक्षे सन्न संगच्छते श्रुतस्य विरुद्ध
स्य वाक्यप्रमाणस्यापेक्षानर्हत्वात् तस्मान्नीलो घट इति प्रतीते घटगतनीलत्वजातिसामान्यताविषयत्वे बाधक
सद्भावेन भ्रान्तित्वापत्तेस्तन्त्वामाण्यमभ्युपगच्छन्ती शिरोमणिवैशिष्ट्यविषयत्वमेवाभ्युपगंतव्यं तस्मान्नूपरस्वरूपता स्य

रा॰ म॰
४५

पत्वेन नीलत्वाश्रयत्वेन प्रमाणाभावस्तस्येति। अथ पक्षसदृशी। मतुब्लोपानुशासनस्यास्य भंगत्वावन्नबाधः नीलो
घटो नीलो गुण इति प्रतीत्योर्विशेषानुभवविरोधेन तत्स्वीरस्य भंगस्योचितत्वात्। मतुब्लोपे नीलादिगुणवि
शिष्टद्रव्यप्रतीतिरन्यत्र नीलत्वादिविशिष्टेऽप्रतीतिरिति अवच्छेदेनापसमर्थनसंभवाच्चारुण्याधिकरणान्या
यविरोधस्तन प्रसज्यते गुणशब्दानां गुणगुण्युभयवाचकत्वेप्यरुणावाम्गुणिपरिग्रहे विभक्तेः शब्दसाधुत्वमा
त्रार्थतया वैयर्थ्यं स्यात् गुणिगतकारणकारकत्वस्य समानाधिकरणपदान्तरतृतीयाविभक्तिलब्धत्वात् न च गुणाप
रिग्रहे गुणगतकरणकारकत्वार्थितया सार्थकत्वसंभवति वैयर्थ्यांगीकारो युक्तः। न च द्व्येकपरापिंगाक्ष्यैकहाय
नीयदगतविभक्तिपदद्वयवदन्यगतिकत्वमस्ति अरुणापदस्य गुणार्थपरिग्रहणे न तस्य सार्थकत्वसमर्थन
संभवात् अतः अरुणेतिश्रुतस्य विरोधेऽपि विभक्तिश्रुतिविरोधेन वाक्यबाधनमुचितमालोच्य पूर्वमीमांसकैर्गुणार्थ
परिग्रहः कृतः अस्माभिस्तु सामानाधिकरण्यस्याप्यनुग्रहसंभवेन बाधनायोगात् पूर्वमीमांसकैर्गुणार्थपरिग्र

न॰वा॰ हः हेतुः अस्माभिस्तु सामानाधिकरण्यस्याप्यनुग्रहः संभवेन तद्बाधनायोगात्। अरुणाशब्दस्य गुणिपर्यंत
४५ त्वमाश्रित्यैव विभक्त्यर्थस्य विशेषणासंक्रान्तिरिष्यते तस्माद्बाधकाभावेन नीलो घट इति प्रतीतेर्नीलो गुण
इति प्रतीतेश्च नीलत्वाश्रयतायां प्रामाण्यमुपपद्यत एव। अतो घटस्य नीलशब्दप्रवृत्तिनिमित्ताश्रयत्वात्
शब्दवाच्यत्वप्रयोजके प्रवृत्तिनिमित्ताश्रयत्वे साक्षात्त्वविशेषणस्य गौरवपराहतत्वाच्च नीलशब्दप्रवृत्तिनि
45 मित्ताश्रयस्य घटस्य नीलशब्दवाच्यत्वं व्याहतमिति विपक्षबाधकतर्कस्याप्रतिहततया वाऽनुमानमेव प्र
योजकं परस्त्वनुमानमेवाप्रयोजकमिति विदुः घटस्य नीलशब्दवाच्यत्वं नीलशब्दस्यार्थेनान्येऽपि रूपविशेषवा
चिनो रसगंधविशेषवाचिनश्च गुणगुण्येकशक्तिमन्तः प्रत्येतव्याः इति गुणगुण्येकशक्तिवादः। अथैषां गु रम॰
णवचनानां शब्दानां गुणगुणिनोर्भिन्ना शक्तिरिति सैद्धान्तिकं पक्षान्तरमाश्रित्य कथाप्रस्तूयते। नीलगुणा ४५
श्रयो घटो नीलशब्दवाच्यः घटनीलगुणान्यप्रतियोगिकाभावप्रतियोगित्वात्। यो घटनीलगुणान्यप्रतियोगिका

भावप्रवृत्तियोगी सन्नीलशब्दवाच्यः यथा नीलगुण इति प्रथमा । अप्रयोजकमिदमनुमानं । नीलगुणस्य
नीलगुणस्य नीलशब्दप्रवृत्तिनिमित्तनीलत्वजात्याश्रयत्वेन नीलशब्दवाच्यत्वेपि घटस्य तदनाश्रयत्वेन
नीलशब्दवाच्यत्वोपपत्तेः । तस्माद्घटो न नीलशब्दवाच्यः नीलत्वजात्यनाश्रयत्वात् यो नीलत्वजात्यनाश्रयः स
न नीलशब्दवाच्यः यथा शुक्लगुणः नीलशब्दवाच्यताभाववत्त्वं नीलत्वजात्यनाश्रयत्वं व्याप्यं तस्मान्न नीलश
ब्दवाच्य इति ॥ द्विती । नाप्रयोजकं मदनुमानं नीलत्वजातिवन्नीलगुणस्यापि नीलशब्दप्रवृत्तिनिमित्तत्वेन तदाश्र
यस्य नीलशब्दवाच्यताया आवश्यकत्वात् त्वदनुमानमेवाप्रयोजकं घटस्य नीलत्वानाश्रयत्वेपि नीलशब्दप्रवृत्ति
निमित्तान्तराश्रयत्वेन तद्वाच्यत्वोपपत्तेरिति तृतीया । त्वदनुमानमप्रयोजकमेव लाघवान्नीलत्वजातिमात्रस्य नीलश
ब्दप्रवृत्तिनिमित्तत्वोपपत्तेः तया क्रोडीकृतानां नीलगुणानामपि तस्य प्रवृत्तिनिमित्तत्वकल्पनायोगात् । अत एव मद
नुमानं नाप्रयोजकं प्रवृत्तिनिमित्तानाश्रयस्य तद्वाच्यत्वायोगादिति । चतुर्थी । मदनुमानं तावन्नाप्रयोजकं यन्नीलो गुण इति

न·वा· व्यवहारात् गुणगतनीलत्वजातेरिव नीलो घट इति व्यवहारात् तद्गतनीलगुणस्यापि तत्प्रवृत्तिनिमित्तघटकत्व
४६ नावच्छंभावात् व्यवहारमात्रस्य प्रवृत्तिनिमित्तत्वे तस्य नोचितत्वात्। अत एव तदनुमानमप्रयोजकं। प्रवृत्तिनिमि
त्ताश्रयस्य तद्वाच्यत्वाभावोपपत्तेरिति। पंचमीका। तदनुमानं तावदप्रयोजकमेव नीलशब्दस्य तद्वाच्यनील
गुणसंबंधात् घटे लक्षणया नीलो घट इति व्यवहारोपपत्तौ न चापि नीलशब्दस्य शक्यांतरकल्पने गौरवादन
46 एवमदनुमानेनाप्रयोजकं प्रवृत्तिनिमित्ताश्रयस्य शब्दवाच्यताया व्याहतत्वादिति षष्ठी॥ अथ सप्तमी। यदि
नीलादिशब्दानां द्रव्ये पुंल्लक्षणाया तदा वर्णदृढादिभ्यः ष्यञ् चेति पाणिनिसूत्रेण वर्णवाचिभ्यो नीलादिश
ब्देभ्यः तत्स्वभाव इत्यर्थे विहितौ ष्यञिमनिचौ प्रत्ययौ नीलादिगुणस्वभावे नीलत्वादिजातौ भवेतां नीला राम·
दिद्रव्यस्वभावे नीलादिगुणे नो दृश्येते घटस्य नीलिमेति हि लोके नीलादिगुण एवोच्यते। अतो नीलादिश ४६
ब्दानां द्रव्यवाचकत्वं अवश्यमभ्युपगंतव्यमिति द्रव्ये तेषां शक्तिकल्पनेन गौरवेण सत्प्रतिपक्षमिति। अथाष्टमी। वैया

करणे। नीलादिशब्दाः केवलानुमानमनुवर्त्तन्तस्येति द्विविधा इष्यन्तेन वा यागुणो गुणिषु द्वितीयास्तु हि शिष्टद्रव्येषु प्रवर्त्तन्ते न दि
हवर्णहष्टादिति संदेहे नीलादिशब्दाः केवला धर्मविषया आहोस्विद् द्वितीया धर्मिविषया वा आहोस्विद् इति संदेहे धर्मिपरदृष्टादिश
ब्दसाहचर्यात् द्वितीया एव याह्या इति वर्त्तते दृष्यते एवमकार्त्स्न्येन नित्यशब्दस्वरूपपरिज्ञानार्थं चिन्तनुरागस्यायेन कालिनत्र
हतिप्रत्ययस्तस्यापादियुक्तानित्यशब्दनिष्पादने प्रवृत्ते वैयाकरणोमनुष्योपस्थमवहननेपि वक्तानलमनुरूपस्य सि
द्धशब्दानामेवार्थनिर्णये प्रवृत्तेर्न्यायविद्भिः न्यायानुसारेणार्थनिर्णयः कार्यः तदनुसरणे च मनुष्योमस्य वैयाकर
ण कास्मितन्तात् केवला एव नीलादिशब्दा गुणो गुणिषु च प्रवर्त्तन्ते इति अभ्युपगन्तव्यं तन्न अश्लायवानु गुणवाचिनामेव ते
षां गुणिषु लक्षणया मत्वर्थप्रपन्नैः गंगादिशब्दानां तीरादिषु वृत्तेर्गुणिषु राज्ञां तन्तेनैव कल्पनीयं। ननु गुणवाचिनामेव नी
लादिशब्दानां गुणिषु लक्षणया चेन्मनुष्योपानुशासनं कर्त्तव्यं स्यात्। नहि गंगादिशब्दानां तीरादिषु लक्षणया प्रवृत्त्यर्थं नी
रादिशब्दस्य कश्चिच्चित्रयलोपानुशासनं क्रियते। अनन्तरं तु शासने ने देमवगम्यते प्रत्यययोगे यावाननर्थं तावदर्थकत्वमपि नी

न॰ वा॰ लादिशब्दानामस्तीति वैयाकरणानामभिप्राय इति। मतुप्लस्य प्रयोगे च नीलगुणवत्तमर्थो भवतीति निर्विवादं। अ
५८ तो नीलादिशब्दानां गुणिप्रवृत्तिकत्वास्तन्मात्रपरकं अन्यथा शब्दार्थनिर्णयाभियुक्तैर्वैयाकरणकृतमतुब्लोपानुशा
सनं वैयर्थ्यप्रसंगाद् इति चेन्नैवं। यतो नीलादिशब्दानां गुणिप्रवृत्तिलक्षणाभ्युपगमे विनमतुब्लोपानुशासनं वैयर्थ्यप्रस
